
मम जननी

(संस्कृतकाव्यसंग्रहः)



प्रणेता

रमाकान्त शुक्लः



देववाणी-परिषद्, दिल्ली

६, वाणी-विहारः, नयी दिल्ली-११००५९

(भारतम्)

देववाणी-परिषद्, ग्रन्थांकः - १२३

मम जननी

(संस्कृतकवितासङ्ग्रहः)

प्रणेता
रमाकान्त शुक्लः

देववाणी-परिषद्, दिल्ली
६, वाणी-विहारः, नयी दिल्ली-११००५९
(भारतम्)

मम जननी : संस्कृतकवितासङ्ग्रहः

प्रणेता : शुक्लः रमाकान्तः

प्रकाशकः : देववाणी-परिषद्, दिल्ली
आर-६, वाणी विहारः,
नयी दिल्ली-११००५९ (भारतम्)

मुद्रकः : मयूर एण्टरप्राइज़ेज़,
डब्ल्यू ज़ेड-३, तिहाड़ गाँव,
नई दिल्ली-११००१८

संस्करणम् : प्रथमम्, २०१३ ई०

मूल्यम् : द्विशतं रूप्यकाणि (रु० २००.००)

ISBN - 978-81-85924-14-4

MAMA - JANANĪ : COLLECTION OF SANSKRIT POEMS

Author : Shukla. Rama Kant

Publisher : Devavani Parishad, Delhi
R-6. Vani Vihar, New Delhi-110059
(India). Phone : 011-28561846

Printer : Mayur Enterprises,
WZ-3, Tihar Village,
New Delhi-110018

Edition : First 2013

Price : Rupees Two Hundred only Rs.200.00

प्रास्ताविकम्

'देववाणी-परिषद्, दिल्ली'ति संस्थया त्रयोविंशत्युत्तरैकशत-तमग्रन्थरूपेण **'मम जननी'**ति संस्कृतकवितासङ्ग्रहस्य प्रकाशनं क्रियते इति तां प्रति कृतज्ञः सन्नस्य ग्रन्थस्य सामान्यपरिचयदानार्थं तत्कर्तृत्वेन किञ्चिदग्रे निवेदयामि।

अस्मिन् ग्रन्थे २०.०१.२००५तः ०१.०१.२०१३ यावत् प्रणीताः पञ्चविंशतिसंख्याका रचनाः सङ्कलिताः सन्ति। 'मम जननी'ति रचना राष्ट्रियसंस्कृतसंस्थानस्य जयपुरपरिसरे आयोजिते युवसम्मेलने समस्यापूर्तिस्पर्धायाः निर्णायकत्वं निर्वहता मया २८.११.२००९ तमे दिनाङ्के प्रणीता। इयमेव समस्या-पूर्त्यर्थं प्रतिस्पर्धिभ्यः प्रदत्तासीत्। मया तत्र समस्यापूर्तिकाले केवलं तूष्णीम्भावेन स्थातव्यमासीत्। मयापि एकस्मिन् कर्गदे स्वजननीमवलम्ब्य कानिचित् पद्यानि लिखितानि। अस्याः शीर्षकमेवास्य कवितासङ्ग्रहस्य शीर्षकत्वेन निर्धारितम्। इयमेव प्रथमरचनारूपेणात्र निधीयते। मम माता श्रीमती प्रियंवदा शुक्ला मुजफ्फरनगरे मम ज्येष्ठभ्रातुः श्रीमतो डॉ.उमाकान्तशुक्लस्य सविधे वर्तमाना १९.०९.२००९ तमे खैष्टे दिनाङ्के शरन्नवरात्रारम्भे शतायुष्यं स्पृष्ट्वा दिवं प्रयाता। तदा वयं सर्वेऽपि भ्रातरो बालभावं विहाय प्रौढा इव सञ्जाताः। यद्यपि ज्येष्ठभ्रातुराशीर्वादप्रदे हस्ते मम शिरसि स्थिते इदानीमप्यहमात्मानं तदपेक्षया बालमेव मन्ये। मातरि विद्यमानायां प्रौढा वृद्धाश्चापि पुत्रा अपराधशतं कर्तुमधिकृताः क्षन्तव्याश्च भवन्ति। किन्तु तस्याः अनुपस्थित्यां ते प्रौढा वृद्धाश्च भवन्ति। माता प्रायः सर्वेषामेव प्राणिनां जनयित्री, लालयित्री, पालयित्री च भवत्येव। **'या देवी सर्वभूतेषु मातृरूपेण संस्थिता। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥'** इयं रचना मया राष्ट्रियसंस्कृतसंस्थानेन ०९.०२.२०१० तमे दिनाङ्के नवदिल्ल्याम् 'एन.सी.ई.आर.टी. सभाभवने समायोजितायां द्वितीयस्यां

'कविभास्कर्यां' (कविगोष्ठ्यां) संस्थानकुलपतेराचार्य श्रीराधावल्लभ-त्रिपाठिनः आध्यक्ष्ये, आचार्य-श्रीनिवासरथस्य, 'अभिराज' राजेन्द्रमिश्रस्य, आचार्य-शिवजी-उपाध्यायस्य च क्रमशो मुख्यातिथित्वे, सारस्वतातिथ्ये, विशिष्टातिथित्वे च पठितासीत्।

'सुनामीताण्डवं' मया २०.०१.२००५ तमे दिनाङ्के दिल्ली-संस्कृताकादम्या समायोजिते गणतन्त्रदिवसकविसम्मेलने पठितासीत्। 'इत्थं बन्धो भाति ते भारतं किम्' इतीयं रचना १८.०१.२००६ तमे दिनांके दिल्लीसंस्कृताकादम्या गणतन्त्रदिवसमुपलक्ष्य समायोजिते अ. भा. संस्कृतकविसम्मेलने पठिता। 'अवस्थी कस्य नो वन्द्यः' इतीयं रचना २०.०५.२००८ तमे दिनांके विलिख्य आचार्य बाबूराम-अवस्थिमहाभागस्य अभिनन्दनग्रन्थे प्रकाशनाय प्रेषितासीत्, तत्र स्थानानुरोधात् सर्वाणि पद्यानि प्रकाशितानि न जातानि। 'ब्रूते मुम्बानगरी' इत्यत्र २६.११.२००८ तमे मुम्बय्यां जाते आतंकवादिनामाक्रमणे मुम्बापुर्या व्यथा प्रकाशिता। इयं रचना २९.११.२००८ तमे दिनांके प्रणीतासीत् । अस्याः पाठः राष्ट्रियसंस्कृतसंस्थानस्य नाट्योत्सवे समायोजितायां संस्कृत- कविगोष्ठ्याम् (२००९ तमे वर्षे) कृतः । 'निदाघदिवसा इमे' २६.०६.२००९ - २९.०६.२००९ इत्यनयोस्तारिकयोः प्रणीता। अस्याः पाठो मया आकाशवाण्या दिल्लीकेन्द्रे समायोजितायां बहुभाषा-कविगोष्ठ्यां कृतः। 'पूर्वोत्तरश्रीस्मृति'रितीयं रचना राष्ट्रियसंस्कृतसंस्थानेन ०९-११.१०.२००९ तमासु तारिकासु सिक्किम राज्यस्य राजधान्यां गङ्टोकनगरे चिन्तन-भवने समायोजितस्य संस्कृतसम्मेलनस्याङ्गभूते ११.१०.२००९ तमे दिनांके सम्पन्ने संस्कृतकविसम्मेलने विरच्य पठितासीत्। तदनु 'भाति मे भारतम्' सर्वैरुपस्थितैः श्रोतृभिः सह गीतमासीत्। 'भास्कराचार्यस्मृति'रित्येषा रचना २४.०३.२००९ तमे दिनांक प्रणीता राष्ट्रियसंस्कृतसंस्थानेन नवदिल्ल्यां समायोजितायां 'कविभास्करी'ति कविगोष्ठ्यां २६.०३.२००९ तमे दिनांके पठिता । अत्र ०३.१२.२००८ तमे दिनांके स्वर्गतस्य अस्मन्मित्रस्य कविविद्वत्सम्पादकस्य

डॉ. भास्कराचार्यत्रिपाठिनः स्मरणं कृतम् । 'बालो विद्यालयगामी'ति रचना ०४.०६.२००९ तमे दिनांके प्रणीता उज्जयिन्यां कालिदाससमारोहे कविसमवाये (२००९) च पठिता । इयं रचना विद्यालयगामिभ्यो बालकेभ्यः समर्पिता । 'शीतलहरी' १४.१.२०१० तमे दिनांके मकरसंक्रान्त्यां प्रणीय मित्रेभ्यः श्राविता । 'कवित्वं मे तिरोभूतम्' इतीयं रचना कवेरवसादं मनाक् पिशुनयति । इयम् उज्जयिन्यां २०.११. २०१० तमे दिनांके प्रणीता तस्मिन्नेव दिने च तत्र कालिदास-समारोह-संस्कृतकविसमवाये श्राविता । नवदिल्ल्यां विज्ञानभवने समायोजिते विश्वसंस्कृत-कवि- समामेलने ऽपीयं रचना ९/१/२०१२ तमे दिनाङ्के मया पठिता । 'पुस्तकम्' इतीयं रचना मया ९/१/२०११ तमे दिनाङ्के प्रणीय तस्मिन्नेव दिने राष्ट्रियसंस्कृतसंस्थान-संस्कृतभारत्यादि-संस्थाभिरायोजिताया विश्वसंस्कृतपुस्तकमेलाया अङ्गभूते राष्ट्रिय-संस्कृतकविसम्मेलने पठिता। अत्र पुस्तकस्य माहात्म्यं गीतमस्ति। ९/४/२०११ तमे ११/४/२०११ तमे दिनाङ्के च अन्ना हजारे महोदयस्य जनलोकपालान्दोलनमवलम्ब्य द्वे रचने प्रणीते। एतयोः पाठो मया २७/४/२०११ तमे दिनाङ्के देववाणी-परिषदि कृतः। 'वर्धापनम्' इत्यत्र दिल्लीतः प्रकाश्यमानं 'संस्कृत-संवादं' पाक्षिकं पत्रमुद्दिश्य शुभकामनाः प्रदत्ताः। २७/६/२०११ तारिकायामेतानि पद्यानि प्रणीतानि। 'नवाभिनन्दनम्' इत्यत्र सुहृद्वर्यस्य डॉ0 पी. टी. जी. वी. रङ्गाचार्युलुमहोदयस्य षष्टिपूर्तिमालक्ष्य २८/६/२०११ तमे दिनाङ्के नव श्लोकाः प्रणीताः। 'अभिवन्दनम्' इत्यत्र ब्रह्मश्रीवेमकोटिसूर्यनारायण-शर्ममहोदयानां सप्ततिपूर्तिमुपलक्ष्य २९/६/२०११ तमे दिनाङ्के नवसु श्लोकेषु मङ्गलकामनाः कृताः। १०/१/२०१२ तमे दिनाङ्के 'पञ्चदशं विश्वसंस्कृतसम्मेलनम्' इत्यत्र नवदेहल्यामायोजितस्य पञ्चदशस्य विश्वसंस्कृतसम्मेलनस्य विवरणं पद्यैरुपन्यस्तम्। 'गुर्जरीयां धरां तां नमामो वयम्' इतीयं रचना मया १८/२/२०१२ तमे दिनाङ्के प्रणीय गुजरातसंस्कृतसाहित्याकादम्या छारोडीस्थे 'दर्शन' महाविद्यालये समायोजिते 'गीर्वाण-गुर्जरी'-कार्यक्रमे पठिता। 'वार्धक! नमो नमस्ते'

इतीयं रचना ११/५/१२ तमे दिनाङ्के प्रणीता। अस्याः पाठः ११/५/२०१२ तमे दिनाङ्के नवदिल्ल्यां राष्ट्रियसंस्कृतसंस्थानेन समायोजितायां पञ्चम्यां कविभास्कर्यां, २६/११/२०१२ तमे दिनाङ्के उज्जयिन्यां कालिदास-समारोह-संस्कृतकविसमवाये, ७/१/२०१३ तमे दिनाङ्के श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठस्य दीक्षान्तसमारोहे समायोजिते कविसम्मेलने, १०/१/२०१३ तमे दिनाङ्के 'एस. सी. ई. आर. टी. इत्यनया संस्थया 'प्रतिभा-विकास-सर्वोदय-विद्यालय, लाजपतनगर, नई दिल्ली' इत्यत्र समायोजिते अध्यापकानां सेवाकालीनप्रशिक्षणकार्यक्रमे, १९/१/२०१३ तमे दिनाङ्के नवदिल्ल्याः हिन्दीभवने समायोजिते गणतन्त्रदिवस-संस्कृतकवि-सम्मेलने, ४/२/२०१३ तमे दिनाङ्के आकाशवाण्या दिल्लीकेन्द्रतः प्रसारिते संस्कृतसौरभकार्यक्रमे, १५/२/२०१३ तमे दिनाङ्के उदयपुरस्थ-मोहनलालसुखाडिया-विश्वविद्यालयस्य संस्कृतविभागेन समायोजितायां संस्कृतकविगोष्ठ्यां, ६/३/२०१३ तमे दिनाङ्के ग्वालियरनगरे समायोजिते भवभूतिसमारोहे, ८/३/२०१३ तमे दिनाङ्के नवदिल्लीस्थ-जवाहरलालनेहरू-विश्वविद्यालयस्य विशिष्टसंस्कृताध्ययनकेन्द्रे समायोजिते कविसम्मेलने, १०/३/२०१३ तमे दिनाङ्के अहमदाबादस्थे कडी-सर्वविश्वविद्यालये आयोजिते गीताज्ञानयज्ञकार्यक्रमे, २३/३/२०१३ तमे दिनाङ्के च उज्जयिन्यां संस्कृतभारती-राष्ट्रियसंस्कृतसंस्थानादिभिस्संस्थाभिरायोजिते संस्कृतसाहित्योत्सवे पठिता। 'इमौ मम हस्तौ' इतीयं रचना ३/३/२०१२ तमे दिनाङ्के लिखिता। अत्र तेषु दिनेषु वृत्तपत्रेषु प्रकाशितो दूरदर्शनेषु प्रसारितश्चैको हृदयविदारक उदन्तो लेखनीविषयः कृतः । 'बलात्कृतिर्मास्तु कुत्रापि' इतीयं रचना १६/१२/२०१२ तमे दिनाङ्के भारतस्य राजधान्यां घटितस्य निर्घृण-बीभत्स-कारुणिक-बलात्कारकाण्डस्य विभीषिकां प्रस्तौति। इयं शताधिकपद्यात्मिका रचना ३१/१२/२०१२ तमे दिनाङ्के पूरिता। तस्मिन्नेव दिने च फेसबुके प्रसारिता १/१/२०१३ तमे दिनाङ्के च दिल्ल्याः प्रकाशिते 'संस्कृतसंवाद'नाम्नि पाक्षिके पत्रे प्रकाशिताऽभूत्। ३१/१२/२०१२ तमे

दिनाङ्के देववाणी-परिषद् दिल्ली-स्वस्तिवाचन-ऋषिमुनिकविवाणी-संयुक्ततत्त्वावधाने समायोजिते एकस्मिन् कार्यक्रमे मयेयं पठिताऽसीत्।

अयं कवितासङ्ग्रहः करुणाद्यः करुणामध्यमः करुणान्तश्चेति मह्यं प्रतीयते । मध्ये मध्ये अन्येऽपि भावा अभिव्यक्तिं लब्धुं प्रयतन्ते। मात्रावृत्त-गणवृत्त-मुक्तवृत्तान्यत्र प्रयुक्तानि। रचनया सहृदयसंवादो यदि भवति तदास्या अन्वर्थता स्यात्। दोषाणां कृते विदुषः सहृदयांश्च क्षमां याचे।

अस्य ग्रन्थस्य अक्षरयोजनायां साहाय्यप्रदानार्थं श्रीजीवनशर्मणः श्रीरामचन्द्ररेग्मीमहोदयस्य च कार्तज्ञं वहामि।

विदुषामाश्रवः

(रमाकान्तशुक्लः)

'रमालयः' आर ६ वाणी-विहारः
नयी दिल्ली ११००५९
११/४/२०१३
चैत्रनवरात्रारम्भः, वि. सं. २०७०

अनुक्रमः

●

मम जननी

मां धृत्वा गर्भे नवमासान्
गृहकर्मपरा नित्यं हृष्टा।
भगवन्तं ध्यायन्ती कुशलं
मे कांक्षन्त्यासीन्मम जननी॥१॥

मामजीजनद् वात्सल्यमयी
सोढ्वा प्रसवस्य परां पीडाम्।
मामपाययत् स्वीयं स्तन्यं
मम पुष्ट्यै तुष्ट्यै मम जननी॥२॥

वर्षाशीतोष्णोत्थं कष्टम्
शैशवेऽथ पौगण्डे वा या।
आसीत् दूरीकर्तुं नित्यं
यतमाना वन्द्या मम जननी॥३॥

मां पालयितुं मां लालयितुं
मां ताडयितुं मां सान्त्वयितुम्।
अगणितयत्नस्था प्रभुरासीद्
वन्दनीयचरणा मम जननी॥४॥

कैशोरे विद्यालयं यदा
गच्छामि स्माहं मित्रैः सह।
पाथेयं मह्यं नित्यमदात्
सा धन्या वन्द्या मम जननी॥५॥

यौवने दिदृक्षुः पुत्रवधूं
सुन्दरीं सुशीला कर्मण्याम्।
वस्त्राभरणं तत्कृतेऽनुरूपं
चिन्वानासीन्मम जननी॥६॥

दुहिता भगिनी जाया याता
सा पितृष्वसा सा पितामही।
अथ भूत्वा मातामही कुटुम्बं
सेवित्वाऽयान्मम जननी॥७॥

पौत्रान् दृष्ट्वा सेवित्वा गां
सम्भाष्य सन्ततीः स्वस्थेव।
दत्वाशीर्वादान् सर्वेभ्यः
स्वर्गता शतायुर्मम जननी॥८॥

या त्यागमयी वात्सल्यमयी
श्रमपरा तथेशध्यानपरा।
अस्मासु च करुणामयी सदा
सा जयति वदान्या मम जननी॥९॥

तस्यां जीवन्त्यामहमासम्
बालोऽपराधकर्माधिकृतः।
पुरुषं विधाय मां गंभीरं
स्वर्याता वन्द्या मम जननी॥१०॥

सा प्रियंवदा प्रियकर्मपरा
सा क्षमामयी सा दयामयी।
छत्रं परिवारशिरस्यासीत्
सुखदा शुभदा सा मम जननी॥११॥

(२८.११.२००९तमे दिनांके राष्ट्रियसंस्कृतसंस्थानजयपुरपरिसरस्य नवसङ्ख्याके कक्षे प्रणीता)

●

सुनामी ताण्डवम्

द्विगुणत्रयोदशतारिकायामथ
दिसम्बरमासि, वर्षे क्रैस्तवे
पुरुषार्थशून्याकाशदलसंख्ये
सार्धषड्वादनमुहूर्त्ते
प्रातर्वेलागमने यादृक्
(२६.१२.२००४तमे दिनांके प्रातः ०६:३०वादनवेलायां)
रचितं ताण्डवमल्पपलेषु
प्रोत्तुंगैः हा! सिन्धुतरंगै-
स्तद्भयदायकमासीत् सत्यम्!
इमे तरंगाः, सागरकम्पाज्जाता
इति वैज्ञानिका मन्वते
इमे सुनामीसंज्ञाः!

षष्टिवितस्ति-परिमितास्तरङ्गाः त्रिंशत्फीटोत्तुंगतरङ्गाः
क्षणेनैव गृहाणि
नौकाः, कैवर्तान्,
नागरिकान्, ग्रामीणान्
समुद्रतटवासिनः, समुद्रतटविहारिणः
मृत्युमुखं प्रापितवन्तः।
महती विनष्टिः
दक्षिणपूर्वेशियाक्षेत्रे
भारते श्रीलंकायां इण्डोनेशियादेशे

थायलैण्डे मलेशियायां च
सार्धैकलक्षसंख्याका जना
मृत्युग्रासीभूताः।

पर्वतोपमैः
कालव्यालफणोपमैः
उत्तुङ्गतरंगैः
जीवनं
क्षणेनैव विनाशितम्
सहस्रशो यूनाम्
बालवृद्धवनितानाम्।
खण्डप्रलय इवाभवत्
मृत्योस्ताण्डवमिवाभवत्।

ये मृतास्ते मृता एव
येऽवशिष्टास्ते जीवन्त्येव
पुनर्वासाय चेष्टा भवन्त्येव।
जीवतां जनानामनुभवाः श्रूयन्ते एव
सूनामितरङ्गः सर्वान् वै
अग्रासीद्धेदं विना जनान्
सर्वेषां तटवासिनां नृणाम्
गतिरेकैवासीन्मृत्युमुखी।
प्रोत्तुंगतरंगैर्यद् वृत्तं
तद्वर्णयितुं नो क्षमः कोऽपि
कः क्षमो वास्ति
शक्ता का वा?
नो दृष्टं प्रलयतरंगैस्तैः

धर्मोऽस्ति कोऽस्य, का वा जातिः?
वर्णोऽस्ति कोऽस्य, किं वा लिङ्गम्,
के गुणा अस्य किं वयोऽस्य वा
को वेशो वा भूषा वा का
कास्ते भाषा भोजनं च किम्
कीदृशः स्वरः कश्चाकारः
कीदृशः स्वभावो गतिरथवा
कीदृशी, कियद्धनमस्यास्ते
अस्तिको वास्ति, नास्तिको वास्ति
रचनाधर्मी वा समीक्षकः
कविरथवा चित्रकरः किं वा
अध्यापकोऽस्ति छात्रो वास्ते
वर्णो वा गृहस्थितो वायम्
वानप्रस्थो वा संन्यासी
को वाजीवः कश्चास्यायः
के पक्षधराः सन्त्यस्य जगति
के सुहृदः सम्बन्धिनश्चास्य
किं क्रीडनकं को रसः प्रियः
किं खादति पिबति? पठति किं वा
किं खेलति किं गानं श्रृणोति
किं पश्यति चित्रं, किं मित्रं
कः शत्रुर्वास्य तटस्थ कः?
दूरस्थो वा निकटस्थो वा
मम भक्तो वायमभक्तो वा
नो दृष्टं वारिधिना किञ्चित्।
एते बाला गृहनिर्माणं

कुर्वन्ति तटे बालुकया ये
भ्रमतस्तटभुवि दम्पती इमौ
एते पर्यटकाः समुत्सुकाः
शोभां पश्यन्ति विलोक्यां ये
आः! एकपदेनैवाक्रान्ता
तटभूमिस्तुङ्गतरङ्गैस्तैः।
कैश्चित्क्षणैश्च नाशिता
सृष्टिरापोमयमासीत्
सर्वं वै।

प्राणिनो निमग्नाः सलिलेऽथो
भवनान्यापोमग्नान्यभवन्
भग्नाश्च कुटीराः सहस्रशः
सागरभूकम्पतरङ्गैस्तैः
ग्रसितं सर्वञ्च तरङ्गैस्तैः।

नौका दूरं क्षिप्तास्तटतः
जलयानानामथ हानिरभूत्
पेयस्य जलस्याभूत् सङ्कट-
मथ रोगविजृम्भणशंकाभूत्
लक्षशो मृताः कैश्चिन्निमिषैः
दृष्टं मानवविज्ञानबलं
दृष्टं वैवश्यं मनुजस्य,
सूनामीसंज्ञतरंगाणां
दृष्टा क्रूरता समुद्रस्य
कृतमस्वास्थ्यं च तरंगैस्तै-
र्द्रविडान्ध्रकेरलानां यादृक्
तत् को वर्णयितुं शक्तः स्यात्?

स्तब्धो भारतदेशः सहसा
इण्डोनेशिया तथा स्तब्धं विश्वं खण्डप्रलये
लंका मलयेशिया च थाईदेशः
म्यांमार-सुमाली-बाँग्लाख्या
देशा उपद्रुता सहसासन्
त्रिंशत्फीटोच्चतरङ्गा ये
उद्भूताः सागरकम्पनतः
कालस्य ताण्डवे पदक्रमं
सन्दर्श्य विनाशमकुर्वन् हा!

किं किं भणामि कथमिव भणामि
किं श्रावयामि तद्भीषणताम्?
सर्वं ग्रासीकृतमभूच्च तैः
सूनामीसंज्ञतरङ्गैर्हा!।
भेदो न कृतो मर्त्ये-मर्त्ये,
पातितं जलं मर्त्ये मर्त्ये।

प्राचलत्ततः परिहारकार्य-
मस्मद्देशे च तथान्येषु
देशेषु, समस्तं विश्वमभूद्
एकं कुटुम्बमिव तत्समये
साहाय्यकृते श्रीलंकायां
मालद्वीपेण्डोनेशिययोः
नौसेनाचालयदभियानं
वस्त्रौषधपात्राण्यदीयन्त
यो विनाश आसीत्स त्वासीत्

किन्तूपरि तस्य जयोऽप्यभवत्
मानवसद्भावितयत्नानाम्।

अथ पुनर्वासकार्यं प्रचलति
क्रमशश्च जीवनं सञ्चलति।
भग्ना मार्गाः सन्धातव्याः
पीडितनृणां स्वास्थ्यं रक्ष्यम्
सर्वं हि भविष्यति कालेन।
सर्वं सहिष्यते कालेन।

मया पृष्टः समुद्रः –
"किं त्वयाचरितम्
किमुचितं ते नु चरितम्?
कथं व्यापादितास्त्वयका
निरीहाः प्राणिनः सिन्धो!
कथय वारान्निधे!
अचलप्रतिष्ठ!"

जलधिराहेत्थम् "अयि मानव!
मदीये मानसे पीडा समुद्भूता
नियन्तुं नैव शक्तस्ताम्
स पीडायास्तरङ्गो मे
सुनामीरूपधर्त्तास्ते
भयंकरहानिदो नृणाम्।
बलात्काराः, नृहत्याः,
दुष्कृतिर्व्यभिचारवृत्तान्ताः,
तथा गर्भस्थकन्यानां विनाशो
मर्मपीडाकृत्

वधूनां दाह उत परिणीतयुगलानां
विदाहो वापहरणं
जनानां लुण्ठनं जननेतृभिर्नित्यम्
मिलित्वा भक्षणं देशस्य
उत्कोचस्तथा अपवञ्चना नित्यम्।
न चारित्र्यं न सत्या वाक्
जनानां मानसे विषमिश्रणं नित्यम्
नवातङ्काः
नवा अपराधवृत्तान्ताः
सतामपमानवृत्तान्ताः
इमे अन्ये च दुर्वाच्या
अवाच्या वाथ वृत्तान्ताः
मनो दुन्वन्ति मे नित्यम्।
किं न कुरुषे वञ्चनं साहाय्यकर्मणि?
किं न विक्रीषे त्वमथ बाला अबोधाः?
किं वापद्यपि न कुरुषे राजनीतिम्?
दानकर्मणि वा न दम्भं चरसि किं त्वम्?
वृत्तपत्रेष्वथ न पठसि प्रत्यहं
क्रूरकृत्यानां कथाः कष्टप्रदाः
अपहृतिं हत्यां बलात्कारान्
तथा
भ्रूणहत्यां भ्रष्टकृत्योत्कोचगाथाम्
अथ च पित्रैवात्मजाया दूषणम्
दृश्यते नो कास्ति दुहिता काथ भगिनी
जीवितानां दाहगाथा वा वधूनाम्?
अर्बुदानां रूप्यकाणां वञ्चनम्

नेतृवर्याणामवाच्याश्चरितलीला:
नापि देवस्वापहारी
नैव राजस्वापहारी
नापि ब्रह्मस्वापहारी
नैव दीनस्वापहारी
दृश्यते निगृहीत एष।
श्रावं श्रावं दर्शं दर्शं
मानवलीला अतिभयावहा:
स्वीयविनाशामन्त्रणशीला:
तूष्णीं स्थित्वा सहे गभीर:
किन्तु असह्या लीला दृष्ट्वा
ममापि चित्तं व्यथापूरितं
वैक्लव्यं यदि कदापि भजते
किमत्र चित्रम्।
मया पीडा निपीता
किन्तु धैर्यं मे यदा लुप्तम्
तदोच्छ्वासो व्यथाया मे समुद्भूत:
क्षणेनैव त्वदीयेयं
विनष्टिश्चाथ सञ्जाता ।
यदि ध्वंसोऽस्ति
तदा निर्माणमपि भविष्यत्येव
परिहारकार्याणि साहाय्यकार्याणि प्रचलन्ति
पुनर्निर्माणं भवति
बालका: क्रीडन्ति
क्रीडिष्यन्त्येव
पीडिता: धैर्यं धर्तुं यतन्ते

अश्रूणि प्रमृज्यन्ते
शनैः शनैरधरेषु स्मितरेखापि
आयास्यति, सहिष्णुता विजृम्भते एव
न मे प्रीतिर्विनाशे ते
तवोत्साहः, पुनर्वासश्रमः, कर्मण्यता वन्द्याः,
अवश्यं जेष्यसि त्वं कष्टबाधा
निष्ठया मानव!

तथा कुर्या यथा मे मानसे
नो जायताम् पीडा
न मारय प्राणिनो व्यर्थम्
न नाशय पालनीयाँस्त्वं
न दूषय पञ्च तत्त्वानि
न वञ्चय आत्मनीनाँस्त्वम्
न शोषय दीनदीनाँस्त्वम्
समेषां रक्ष वृत्तिं त्वम्
प्रकृत्या सह कुरु प्रीतिम्
नरं नारायणं मत्वा
जगन्मत्वा जगन्नाथं
सदा सेवस्व प्रीत्या त्वम्।
सुनामी किं करिष्यति ते?
जयस्ते स्यात्।

न हि मानुषात् श्रेष्ठतमं हि किञ्चिद्
यदिदं मया श्रुतं त्वद्विषये
तन्मे दर्शय नित्यं मानव!
त्वं पालय मर्यादां स्वीयाम्

अहमपि निजमर्यादां सम्यक्
सदैवं पालयितुं प्रतिजाने
भुवि वारिणि तेजसि वायौ
नभसि प्रदूषणं मा त्वं कुर्याः,
अक्षैर्मा दीव्यः कृषिमिद्धव
अन्नं दुग्धं मधु पुष्पाण्युत्पादय,
भूतदयां विस्तारय
येन
सर्वे सुखिनः सदा भवन्तु।

अहं प्रीणामि नो ध्वंसात्
अहं जलधिः
अहं जीवनमयः
शैत्यं मे प्रकृतिः
पुनः शान्तो भविष्यामि
असह्या मे न पीडा स्यात्
यथा, कुर्यास्तथा यत्नम्
सदा कुर्यास्तथा यत्नम्

(रचना-तिथिः - २०/०१/२००५)

इत्थं बन्धो! भाति ते भारतं किम्?

प्रश्नान् प्रष्टुं सांसदा लोकमान्या
विंत्तं लब्धुं सस्पृहं कामयन्ते।
स्नानागारे सन्ति सर्वे हि नग्नाः
इत्थं बन्धो! भाति ते भारतं किम्?॥१॥

अस्मिन् राज्ये शत्रुभूतोऽस्ति डित्थः
तस्मिन् राज्ये मित्रभूतः स एव ।
सत्ता काम्या, नैव सिद्धान्तरक्षा
श्रीमन्नित्थं भाति ते भारतं किम्?॥२॥

स्वास्थ्यं नष्टं जायते कृत्रिमेण
दुग्धेनात्र प्रत्यहं बालकानाम्
एतद्वृत्तं मुद्रितं वृत्तपत्रे
श्रीमन्नित्थं भाति ते भारतं किम्?॥३॥

निर्माणं यैः कारितं प्राग् गृहाणाम्
ते बुल्डोजर्चालका वन्दनीयाः ।
सुप्ताः पूर्वं जागरूकाः इदानीम्
इत्थं बन्धो! भाति ते भारतं किम्?॥४॥

'सर्वः सर्वत्रास्तु कर्माधिकारी
सर्वे शिक्षा-स्वास्थ्य-वृत्तीर्लभन्ताम्'।
नेता नेत्थं कोऽपि काङ्क्षां करोति
श्रीमन्नित्थं भाति ते भारतं किम्?॥५॥

(रचनातिथिः १८.०१.२००६)

अवस्थी कस्य न वन्द्यः!
(अवस्थि-सप्तत्रिंशतिः)

आचार्यः श्रीबाबू-
रामोऽवस्थीति विश्रुतो विद्वान्।
अभिनन्द्यते सुहृद्भि-
र्ज्ञात्वाहं मोदमेमि परम्॥१॥

अभिनन्द्योऽस्ति कवीना-
मयमाचार्यः कविस्तेषाम्।
मञ्चे येषां प्रस्तुति-
रकार्यनेन स्वकृतपद्यैः॥२॥

संस्कृतकविसम्मेलन-
सञ्चालननिपुण आचार्यः।
बाबूरामोऽवस्थी
जयति बुधानां सभामध्ये॥३॥

अध्यापन-संशोधन-
लेखन-वाग्मित्व-संस्कारैः।
बाबूरामोऽवस्थी
कस्य न वन्द्योऽस्ति संस्कृतज्ञस्य॥४॥

कविवरमभिरामश्री-
बाबूरामं न कोऽभिजानाति।
सरलसरसरचनाभिः
सहृदयहृदयानि यो हरति।।५।।

निर्माय कथां रूपक-
मथ सङ्गीतं निबन्धं वा।
संस्कृतजगदाकाशेऽ-
वस्थी नक्षत्रमिव लसति।।६।।

संस्कृतबोधिन्यस्य,
कृतिरास्ते लोकविख्याता।
संस्कृतशिक्षकनामा
ग्रन्थोऽथो पञ्चभागेषु।।७।।

बाबूराममवस्थिन-
मविरतसुरवाक्प्रचारसंसक्तम्।
वीक्ष्य विपञ्चीवादन-
निपुणा हृष्यति गिरां देवी।।८।।

साहित्यं सङ्गीतं
कलास्तथा सेवमानेन।
अवस्थिना श्रीबाबू-
रामेणाप्तं स्वजन्मसाफल्यम्।।९।।

नवनवरचनावैभव-
तोषितसहृदयसमूहाय।
अवस्थिने श्रीबाबू-
रामाय समर्पितास्ति मे प्रणतिः॥१०॥

अवस्थिनः श्रीबाबू-
रामाज्जाने परं न कञ्चिदहम्।
यो निष्कारणमर्चति
निर्जरवाणीं प्रसन्नः सन्॥११॥

आयातु यातु लक्ष्मीः
स्तुवन्तु निन्दन्तु नीतिनिपुणा वा।
अवस्थिनः श्रीबाबू-
रामस्यास्ते न चित्तविक्षोभः॥१२॥

बाबूरामेऽवस्थिनि
गैर्वाणीसाधनालीने।
सर्वं कुशलं नूनं
संस्कृतजगतो वरीवर्ति॥१३॥

ऋजुता साधारणता
विनयः सन्तोष उच्चचारित्र्यम्।
आशुकवित्वं चास्मिन्
विद्वत्प्रेष्ठे प्रसीदन्ति॥१४॥

बाबूरामावस्थिन्!
विद्वद्वृन्दारविन्दमार्तण्ड।
त्वं पश्य जीव शृणुयाः
ब्रूहि च शरदां शतं विद्वन्॥१५॥

तव जन्मवंशवृद्धि-
र्भवतु सतां सौख्यदावस्थिन्।
विद्यावंशोन्नतिरपि
भवतो भवतात् सुजनसुखदा॥१६॥

अभिनन्दनेन भवतो-
ऽभिनन्द्यते सांस्कृती सेवा।
लखीमपुरखीरीला-
क्रोडकृतं तावकं च तपः॥१७॥

अभिनन्दनेन भवतो-
ऽभिनन्द्यते सा परम्पराऽस्माभिः।
त्यक्त्वा सुखमखिलं या
सहते कष्टं सुलक्ष्यपूर्त्यर्थम्॥१८॥

समधीत्य भवद्रचना
गद्ये रचितास्तथा पद्ये।
हृष्टा भवन्ति नितरां
बाला वृद्धा युवानश्च॥१९॥

इदमभिनन्दनमास्ते
वाण्या नित्यं सपर्यायाः।
इदमभिनन्दनमास्ते
ऋजुताया अथ तपस्यायाः॥२०॥

यस्य गृहे बाला अपि
संस्कृतसेवासमर्पिताः सन्ति।
स भवान् बाबूरामो-
ऽवस्थी विद्याव्रती जयतात्॥२१॥

संस्कृतलोकेऽप्यधुना
धूर्ताः सुलभाः पदे पदेऽसन्तः।
बाबूरामावस्थिन्!
भवादृशा दुर्लभाः सन्तः॥२२॥

भ्रष्टाचारनिमग्ना
उत्कोचपराश्चरित्रहीनाश्च।
संस्कृतजगति पिशाचाः
सतो जनान् परिबुभूषन्ति॥२३॥

पयोमुखा विषकुम्भा
राममुखाः कक्षकौक्षेयाः।
लालाटिका अनेके
संस्कृतलोकेऽपि दृश्यन्ते॥२४॥

निरर्थकं ये परहित-
घातपरा अपरिभाषेयाः।
तेऽपि सुलभ्याः संस्कृत-
लोक इदानीं पदासीनाः॥२५॥

पुरस्कृतेरुचितांशं
स्वभागधेयत्वबुद्ध्या ये।
सुरक्षितं कुर्वाणाः
सुलभास्ते संस्कृतक्षेत्रे॥२६॥

पदचुम्बनं स्वशिष्यैः
कक्षेषु सभासु मार्गे च।
कांक्षन्तोऽपि न तेषां
हितावहाः संस्कृतज्ञा अपि॥२७॥

अश्राव्यं यदवाच्यं
यच्चाचिन्त्यं तथा च यदकृत्यम्।
तदनुष्ठानपराः किं
संस्कृतलोके न दृश्यन्ते॥२८॥

लोकोपकारनिरता-
स्तपस्विनो वाङ्मनःकायैः।
शिष्यहितं कुर्वाणा
अपि नैके संस्कृतक्षेत्रे॥२९॥

संस्कृतज्ञपरिभाषा-
भूता एते हि गणनीयाः।
अधीतिबोधाचरण-
प्रचारलग्नास्तपोनिष्ठाः॥३०॥

एतेष्वपि निजकाव्यै-
र्लोकहितं साधयन्ति ये नित्यम्।
ते वै जयन्ति कवयो
लक्षेष्वेके सुपर्वगिरः॥३१॥

ते वागर्थसहायाः
सरस्वतीस्तन्यपरिपुष्टाः।
कवयः सर्वाः सुविधा-
स्त्यक्त्वा लोकं प्रबलयन्ति॥३२॥

येषां यशःशरीरे
जरामरणजं भयं नास्ति।
कोटिकोटिजनताया-
स्ते कवयो वन्द्यतां यान्ति॥३३॥

तेष्वेव हि गणनीयो
भवानवस्थिन् कवे विद्वन्।
अभिनन्दनेन भवतः
प्रीयन्तां सज्जना लोके॥३४॥

सत्सु प्रतिष्ठितास्ते
जगती नोऽसत्सु जृम्भमाणेषु।
वन्द्या नैवासन्तः
सन्तः सर्वत्र वन्द्याः स्युः।
(मान्या नैवासन्तः, सन्तः सर्वत्र सम्मान्याः)॥३५॥

सद्वन्दनेन चित्तं
भवति पवित्रं जनानां वै।
भवतः सतोऽभिनन्दन-
कर्तॄणां स्यान्मनः पूतम्॥३६॥

'सुरभारती-सपर्या-
कुसुमाञ्जलि'-नाम्नि सद्ग्रन्थे।
प्राप्य स्थानमिमा मे
मोदन्तां सुरचना आर्याः॥३७॥

(रचना-तिथिः २०/०५/२००८)

●

ब्रूते मुम्बानगरी

ब्रूते मुम्बानगरी-
  ''दृष्टा भवता ममावस्था।
मुष्टिमितैरातंकिभि-
  रपमानो मे यथाकारि॥१

वसुशून्याभ्रनयनमित (२००८) -
  वर्षे खैष्टे नवम्बरे मासे।
षड्विंशतारिकायां
  यद्वृत्तं तत्कथं वाच्यम्॥२॥

दशातिरेकिजनानां
  समुद्रमार्गेण मां प्रविष्टानाम्।
उत्पातैरसुहीना
  कृता जना मे द्विशतसंख्याः॥३॥

चतुःशतप्रायो मयि
  निवासिनिवहोऽभवद्व्रणितः।
व्यथिताः सर्वे भारत-
  वासिन आसन्मम व्यथया॥४॥

किंकर्तव्यविमूढं
  शासनमासीद् विवशविवशम्।
घण्टाषष्टिं यावन्
  मे न्यक्कारो विदारणं चास्ताम्॥५॥

रक्षाकर्मि-कमाण्डो-
दलैः कृतं मे परित्राणम्।
तदनु च कश्चिन्मन्त्री
त्यागदलं दत्तवान् चतुरः॥६॥

अद्यत्वेऽ हं पुनरपि
स्वभावमाप्तास्मि सोत्साहा।
तथापि भवता काचित्
चिन्ता कार्या प्रशासकवर॥७॥

प्रथमं त्वेतच्चिन्तय
कथं प्रविष्टा भरतभूमिम्।
अप्रतिहतगतयस्ते
कीदृक् तटरक्षणं भवति॥८॥

तदनु च चिन्तय पुनरपि
नो भूयादीदृशं काण्डम्।
सिद्धादेशो भूत्वा
भायय तान् क्रूरकर्मपरान्॥९॥

जले स्थले वाकाशे
गुप्तास्त्राणां प्रयोगेण।
नाश्या अस्मद्रिपव-
स्तदैव शान्तिर्भवेद्राष्ट्रे॥१०॥

जहि शान्तिशत्रुभूतान्
देशरिपून् त्वं विना शंकाम्।
आतंकिनमायान्तं
हन्यादेवाविचारयन् धीमान्॥११॥

गृहरक्षां प्रथमं कुरु
ततश्च नाशय निगूढानि।
केन्द्राण्यातंककृतां
प्रशिक्षणार्थं मनोयोगात्॥१२॥

यदि तेषां पक्षधरः
कोऽप्युत्तिष्ठेत्तमपि नाशय।
राष्ट्रहितार्थं भवता
कठोरकर्मापि करणीयम्॥१३॥

शृणु मे रक्षक शासक!
बुद्धिमहं ते विजानामि।
बलहीना किल बुद्धिः
प्रभावहीना सदा भवति॥१४॥

आत्मबलेनैवाप्यो
जयः समस्यासु रिपुषु तथा।
यं यं पश्यसि तं तं
स्वरक्षकं नो विजानीयाः॥१५॥

चन्द्रे यानं प्रेषित-
मास्ते वैज्ञानिकैः सफलम्।
त्रिरङ्गवर्णो जयति
ध्वजोऽस्मदीयो विधोः पटले॥१६॥

अग्नित्रिशूलनागा-
र्जुनपृथ्वीनामकास्त्राणि।
ब्रह्मोसधनुःप्रभृती-
न्यथ कं कालं प्रतीक्षन्ते॥१७॥

अद्यत्वे त्वं विश्वं
स्वं पक्षधरं विधातुमिच्छसि चेत्।
तदा प्रदर्शय विक्रम-
मात्मबलं पूर्वमरिषु त्वम्॥१८॥

पार्श्ववर्तिनां चेष्टां
यदि निश्चयतोऽभिजानासि।
तर्हि प्रमाणदानैः
स्वसमयनाशं किमिति कुरुषे॥१९॥

शाम्येत्प्रत्यपकारै-
र्न सामनीत्या कुटिलचेष्टः।
जहि शत्रुं त्वं शीघ्रम्,
अवन्ध्यकोपो भवान् भवतात्॥२०॥

त्वं येषां प्रतिनिधिरसि
तेषां चित्तानि दह्यन्ते।
अव तेषां सम्मानम्
आतंकिजनाँस्त्वमुच्चाटय।।२१।।

दश दुष्टास्तव देशे
निर्द्वन्द्वं घ्नन्ति शतशो नॄन्।
त्वं शान्तो यदि शेषे,
धिक् ते शान्तिं क्षमामथ ते।।२२।।

सैन्यमनोबलहननम्
आतंकिमनोबलस्य वृद्धिर्वै।
जनताया अपमानः
शासकपदवीतिरस्कारः।।२३।।

जनताया जनतार्थं
शासनमाचरति जनतैव।
जनतन्त्रे, त्वं जनता-
चित्तं विज्ञाय कुरु कार्यम्।।२४।।

देशसुरक्षार्थं त्वं
सन्नद्धो भव तथोत्तिष्ठ।
दुष्टस्य चिकित्सार्थं
प्रमाणदानं न पर्याप्तम्।।२५।।

कर्करोगमिव मत्वा-
तंकं ध्वंसय सपद्येव।
कालक्रमेण नो चे-
दसाध्यतमेष गन्तास्ति॥२६॥

कूटनीतिसन्धानं
नास्त्युचितं त्यक्तलज्जेषु।
शठेषु शाठ्यं कार्यं
लत्ताभूता न वार्तयाराध्याः॥२७॥

इति मद्वाक्यं श्रुत्वा
प्रतापशाली भव त्वं भो।
मनसि वचसि कार्ये त्वं
सोत्साहः सन् विजृम्भस्व" ॥२८॥

(रचनातिथिः - २९/११/२००८)

●

भास्कराचार्य-स्मृतिः

शून्यसिद्धिग्रहात्मात्मकेऽब्दे(१९८०) मया
मेरठाख्ये पुरे स्वीयकाव्यं पठन् ।
अक्षिलक्ष्यीकृतो यस्त्रिपाठी कविर्
भास्कराचार्य! स त्वं मया स्मर्यसे॥१॥

श्रीनिवासो रथश्चापि तत्र श्रुतो
मेघगम्भीघोषेण गीतिं पठन् ।
सोऽपि यस्य प्रशंसापरो लक्षितो
भास्कराचार्य! स त्वं मया स्मर्यसे॥२॥

लखनऊनामके विश्रुते यो पुरे
संस्कृताकादमीयोजिते मेलने ।
मत्समक्षं स्वगीतिं मुदाश्रावयद्
भास्कराचार्य! स त्वं मया स्मर्यसे॥३॥

देववाणी-सभायोजिते देहली-
विश्वविद्यालयस्थे सभागारके।
वर्णितो येन गीते त्रिरङ्गध्वजो
भास्कराचार्य! स त्वं मया स्मर्यसे॥४॥

येन जाबालिपुर्यां तथा सागरे
रायपूरेऽम्बिकापुर्यथो बस्तरे।
उज्जयिन्यां कवीनां कृता उत्सवा
भास्कराचार्य! स त्वं मया स्मर्यसे॥५॥

मिश्रराजेन्द्रवर्य्येण साकं मया
यस्य विज्ञातया जन्मतिथ्यानुजः।
स्वीकृतो यश्च खर्जूरवाहे मुदा
भास्कराचार्य! स त्वं मया स्मर्यसे॥६॥

यः फिलाडेल्फियैडिन्बरायोजिते
विश्वगीर्वाणवाणीसुसम्मेलने ।
स्वीयकाव्येन लोकान्मुदातोषयत्
भास्कराचार्य! स त्वं मया स्मर्यसे॥७॥

यश्च 'भैया प्रणामे'ति मृद्वीकया
सम्मितां दूरभाषे स्ववाचं वदन्।
चित्तमस्मादृशां प्राविशत् सादरम्
भास्कराचार्य! स त्वं मया स्मर्यसे॥८॥

मञ्चसञ्चालको विश्रुतो यः कवीन्
आह्वयन् पद्यबद्धैः सुसम्बोधनैः।
कस्य नासीत् प्रियः शब्दशिल्पी महान्
भास्कराचार्य! स त्वं मया स्मर्यसे॥९॥

यस्य काव्यं तथा नाट्यमास्ते शुभं
यस्य गद्यं तथा पद्यमास्ते शिवम्।
शोध-सम्पादनालोचनाश्च श्रुताः
भास्कराचार्य! स त्वं मया स्मर्यसे॥१०॥

जैपुरे भोजपालेतिसञ्ज्ञे पुरे
भव्यधारानगर्य्याञ्च गोपाचले।
येन साकं मया काव्यपाठः कृतो
भास्कराचार्य! स त्वं मया स्मर्यसे॥११॥

शिष्यवर्यस्तथा सद्गुरुः शोधकः
सत्कविः पत्रिकायाश्च सम्पादकः।
यो गुणज्ञश्च दोषज्ञ आसीत्तथा
भास्कराचार्य! स त्वं मया स्मर्यसे॥१२॥

अक्षराजाशतीस्नेहसौवीर-
मृत्कूटकृष्णाश्वधाटीतिसञ्ज्ञाधराः।
भावुका आस्वदन्ते यदीयाः कृतीः
भास्कराचार्य! स त्वं मया स्मर्यसे॥१३॥

सागरोज्जैनगोपाद्रिभोपाल-
धाराम्बिकापूरदिल्लीपुरीकाशिषु।
येन साकं मया सूरयो वन्दिता
भास्कराचार्य! स त्वं मया स्मर्यसे॥१४॥

यो रमाकान्तशुक्लस्य मित्रानुजः
आतिथेयोऽतिथिर्नैकशोऽजायत।
येन सग्धिः सपीतिश्च मे साधिते
भास्कराचार्य! स त्वं मया स्मर्यसे॥१५॥

मञ्चसञ्चालनं यस्य चेतोहरं
संवृतास्या च वाक्यावली ह्लादिनी।
गौरमूर्तिर्यदीया मनोमोहिनी
भास्कराचार्य! स त्वं मया स्मर्यसे॥१६॥

हस्तलेखाङ्किते डाक-सम्प्रेषिते
पोष्टकार्डे यदीया लिपी राजते।
कृष्णमुक्तावली स्वर्णपत्रे यथा
भास्कराचार्य! स त्वं मया स्मर्यसे॥१७॥

येन साकं मया दूरयात्राकृताः
सेविता येन साकं च गोष्ठ्यो मया।
मां तथाऽन्वग्रहीत् मेऽतिथीभूय यो
भास्कराचार्य! स त्वं मया स्मर्यसे॥१८॥

एकमात्रं सुतः संस्कृतं पाठितः
श्रीनिलिम्पः सुधीः सत्कविर्येन वै।
सत्कृतो यः पुरस्कारवृन्दैः कृती
भास्कराचार्य! स त्वं मया स्मर्यसे॥१९॥

सत्कविस्त्वं तथाचार्यवर्यः श्रुतः
त्वं च 'दूर्वा'ख्यसत्पत्रसम्पादकः।
यद्यशस्ये शरीरे न मृत्योर्भयम्
भास्कराचार्य! स त्वं मया स्मर्यसे॥२०॥

द्वादशेऽक्टूबरे (१२.१०.२००८ ई.) ग्रन्थलोकार्पणे
भव्यमिन्दौरभूभागमावां गतौ।
अन्तिमाभाषणं यस्य तत्र श्रुतं
भास्कराचार्य! स त्वं मया स्मर्यसे॥२१॥

जीव आयाति, याति स्वकार्यं विधा-
यात्मनः शान्तिलाभार्थमस्यां क्षितौ।
यो हि निःश्वस्य प्राणान् सुताङ्केऽत्यजत्
भास्कराचार्य! स त्वं मया स्मर्यसे॥२२॥

तावकं पार्थिवं यच्छरीरं सखे!
तद्विलीनं प्रकृत्यां न शङ्कात्र भो।
स्रग्विणी यस्य कीर्तिः स्थिरा राजते
भास्कराचार्य! स त्वं मया स्मर्यसे॥२३॥

यस्य काव्येषु निर्वाचनं वर्णितं
यस्य काव्येषु कारुण्यमुट्टङ्कितम्।
यस्य काव्येषु राष्ट्रोदयः काङ्क्षितो
भास्कराचार्य! स त्वं मया स्मर्यसे॥२४॥

यश्च दैसम्बरीये तृतीये दिने
कीर्तिशेषोऽभवत् सूनुना सेवितः।
सिद्धिशून्याभ्रनेत्राब्दके (२००८)क्रैस्तवे
भास्कराचार्य! स त्वं मया स्मर्यसे॥२५॥

काव्यमास्तां त्वदीयं जनालोकदं
वर्धतां ते यशो दीर्घकालावधि।
यस्य सारस्वती साधना मोददा
भास्कराचार्य! स त्वं मया स्मर्यसे॥२६॥

(रचनातिथिः २४.०३.२००९)

●

बालो विद्यालयगामी

पठति पुस्तकं, लिखति सुलेखं
बालो विद्यालयगामी।
क्रीडाङ्गणे च खेलति खेलाः
बालो विद्यालयगामी॥१॥

ग्रन्थालयं याति वाचयितुं
वृत्तपत्रकं प्रत्यग्रम्।
प्रश्नोत्तरं सतीर्थैः कुरुते
बालो विद्यालयगामी॥॥२॥

बालोद्याने श्रमं विधत्ते
वृक्षान् सिञ्चति दयापरः।
रचयति चित्रं श्यामपट्टके
बालो विद्यालयगामी॥३॥

ईशवन्दनां कुरुते मुदितो
गुरून् नमति अर्जयति कलाः।
संगणके स्वं कार्यं कुरुते
बालो विद्यालयगामी॥४॥

विविधनाटकाभिनयं कुरुते
व्यायामं कुरुते स्फूर्तः।
लिपिं पठति भाषामवगच्छति
बालो विद्यालयगामी॥५॥

पृष्ठे वहति स्यूतं नैजं
पुस्तकादिभिः परिपूर्णम्।
मध्यान्तरेऽश्नाति पाथेयं
बालो विद्यालयगामी॥६॥

मनोरञ्जनं ज्ञानवर्धनं
शैक्षिकयात्राभिः कुरुते।
यातायातनियममवगच्छति
बालो विद्यालयगामी॥७॥

भवति भविष्यं निजदेशस्य
प्रभवति काठिन्यं जेतुम्।
नागरिकः कालेन जायते
बालो विद्यालयगामी॥८॥

सुखार्थिनो वा कुतोऽस्ति विद्या
विद्यार्थिनः कुतश्च सुखम्।
त्यजति सुखं विद्यामर्जयति च
बालो विद्यालयगामी॥९॥

यदि शैशवे पठति युक्तः सन्
भवति यौवने गुणशाली।
देशं विश्वं सेवितुमर्हति
बालो विद्यालयगामी॥

(रचनातिथि: ०४.०६.२००९)

●

निदाघ-दिवसा इमे!

निदाघदिवसा इमेऽतिभयदा जगत्प्राणिनां
भयंकरकरैर्युतो रविरयं ललाटन्तपः।
कृतान्तरसनोपमा वहति चोष्णवातावली
परंतु नहि दृश्यते गगनमण्डले तोयदः॥१॥

प्रचण्डकिरणैः रवेर्भुवनमण्डलं ताप्यते
मनुष्यपशुपक्षिभिः पदमनातपं मृग्यते।
समे मुदमवाप्नुवन्ति पथिकास्तरुच्छायया
जलं समभिकांक्ष्यते प्रतिपलं पिपासाकुलैः॥२॥

भयंकरकरे रवौ क्षिपति तूर्णमंगारकान्
भुवि प्रखरमारुतैरसुमुचो बहून् पादपान्।
सुतानिव दयापरो ह्यवति हन्त माली कृती
जलेन परिषेचितानविगणय्य नैजं क्लमम्॥३॥

तप्तैर्वाताघातै-
रवितुं लोकान् नभसि मेघाः।
आरक्षिविभागजना
इव समये नैव दृश्यन्ते॥४॥

शोषस्याशंकास्ते
हाहाकारो जलाय जागर्ति।
विद्युदभावो जातः,
किमतोऽपि परं प्रतीक्षसे मेघ॥५॥

आषाढस्य प्रथमे
दिवसे ते दर्शनं नाभूत्।
नापि प्रशमदिनेषु
त्वं दृष्टिपथं समायातः॥६॥

कुंभकाराः प्रसीदन्ति ग्रीष्मे सीदन्ति कर्षकाः।
युगपद् दृश्यते लोके हर्षशोकपरम्परा॥७॥

वित्तेशा येऽट्टस्था-
स्ते तु जनित्रैः स्वकार्य-सिद्धिपराः।
अथ ये निःस्वास्ते किल
तितिक्षयाग्रे सरन्ति जनाः॥८॥

यया दुस्सहं ग्रीष्मं
सोढ्वापि जनः स्वकार्यनिरतोऽस्ति।
जिजीविषां तां वन्दे
संसारालम्बनीभूताम्॥९॥

मधुमेहपीडिता ये
ते शीतलपेयदर्शनं कृत्वा।
अपि तन्नैव लभन्ते
षण्ढास्तरुणीजनं हि यथा॥१०॥

अवशीतनयन्त्राणां
निष्क्रियता विद्युतोऽभावे।
घटेषु निहितं नीरं
पिबन्ति लोकास्तदा समुदम्॥११॥

वीथीसु नालिकोपरि
सोपानार्थं गृहद्वारे।
स्थापितमश्मानमध-
श्छायायां श्वा स्वपिति दिवसे॥१२।

श्रमिणो गृहनिर्माणं
कुर्वाणाः पश्य मध्याह्ने।
श्रमापहारार्थमधो
गृहपृष्ठं शेरते ध्वान्ते॥१३॥

प्रक्षालितानि वस्त्राणि येन शुष्यन्ति सत्वरम्।
गृहिणी प्रसन्नतां याति गृहकार्येषु तत्परा॥१४॥

विद्युदभावे प्रक्षा-
लनयन्त्रस्यासफलतायाम्।
वस्त्राणां कूटं हा
पश्यति चिन्तातुरा गृहिणी॥१५॥

ग्रामे वा नगरे वा
विपिने वा ग्रैष्ममातंकम्।
सहमाना अपि लोकाः
कुर्वाणाः कर्म जीवन्ति॥१६॥

स्वीयजलं किल मेघ!
स्वयं न पातुं समर्थोऽसि।
अत उचितं वे वच्मि
द्रागेवागत्य वर्ष त्वम्॥१७॥

(रचनातिथि: २६.६.२००९)

विडालिका निजशावक-
सहिता विश्रम्भ्य सेवते चतुरा।
कूलरयुतकक्षागत-
शीतं वायुं प्रतप्ताङ्गी॥१८॥

मध्याह्नार्कमरीचि-
प्रतप्तदेहोऽपि कर्मनिष्ठः सन्।
वितरति पत्राणि यथा-
संकेतं पत्रवितरणकृत्॥१९॥

जलनलिकोपरि काक-
स्तुण्डेन नलाग्रमुद्घाट्य।
जलपानार्थं यतते
साशंकः सन्नितस्ततः पश्यन्॥२०॥

दिल्ल्यां छत्रं नीत्वा
न शक्यते प्रायशो गन्तुम्।
भित्तिच्छायाश्रयिण-
स्तस्माद्गच्छन्ति पादाताः॥२१॥

महानसे चुल्ल्यग्रे
गृहिणी भोज्यं पचति धीरा।
भीष्मो ग्रीष्मो वास्याद्
अथवा शीतः प्रकम्पकरः।।२२।।

एतस्मिन्नपि काले
त्रिचक्रनरयानचालकाः श्रमिणः।
परिवारपालनार्थं
धीरा यानानि कर्षन्ति।।२३।।

वह्निपरीता पृथ्वी
वह्निपरीतं जलं तथा व्योम।
वह्निपरीतो वायुः
सर्वत्राग्निः परिव्याप्तः।।२४।।

रात्रौ विद्युदभावे
स्वाक्रोशं व्यक्तुमायान्ति।
नागरिका विक्षुब्धा
विद्युद्वितरणविभागं प्रति।।२५।।

प्रस्विन्नगात्रलोका
वस्त्राण्यवतार्य विद्युतोऽभावे।
हस्तव्यजनेन निजं
क्लममपनेतुं प्रयत्नपराः।।२६।।

जलसञ्चयपात्रेषु
स्नान्ति समोदं गृहे शिशवः।
चिन्तां विवर्धयन्तो
मातुर्जलसंक्षयोद्भूताम्॥२७॥

दशहर्याम्रफलान्यपि
वर्षाभावे न रोचन्ते।
उद्वेगं जनयन्ति
प्रचण्डभूते निदाघेऽस्मिन्॥२८॥

सत्त्वोद्याने हस्ती
जलधिकरी (हिप्पो) सिंह एणश्च।
तापाधिक्येऽथ जला-
भावे नितरां व्यथामाप्ताः॥२९॥

यापय कालमिमं त्वं
सखे कथंचित् श्रमेण धैर्येण।
सोढे ग्रीष्मे सर्वे
ऋतवः सह्या भवन्त्येव॥३०॥

रात्रावप्यत्युष्णा
वाताः प्रस्वेददायिनो वान्ति।
गृहपृष्ठगता अपि नो
सुखनिद्रां प्राप्नुवन्ति नराः॥३१॥

ए.सी.-यन्त्रैः सौख्यं
लभमाना अधिकृताः स्वकक्षेषु।
विद्युद्गमने जाताः
प्रस्विन्नाङ्गा मुमूर्षव इव।।३२।।

यस्मिन्नङ्गे वस्त्रं
तद्गौरं यत्र तन्न तच्छ्यामम्।
निन्दति घर्मं तन्वी
मुकुरे स्वांगानि पश्यन्ती।।३३।।

कर्त्तव्यपालने त्वं
यदि प्रमादी भवसि मेघ!
उच्चैःपदस्थितः सन्
वद केषां नानुकार्योऽसि?।।३४।।

बहवोऽतिसारतापा-
घातादिभिरपगतप्राणाः।
इत्थमुदन्ताः प्रायो
वृत्तदलेषु प्रकाश्यन्ते।।३५।।

इन्वर्टरयन्त्राणां
सामर्थ्यं क्षीयते रात्रौ।
दीर्घे विद्युदभावे,
सर्वे विकला भवन्ति तदा।।३६।।

रविदग्धेष्वंगेषु
स्त्रियो नरा बालका बालाः।
मुलतानीमृल्लेपं
कृत्वा शान्तिं मनाग् यान्ति॥३७॥

सन्स्क्रीनेति ख्याता-
मवलेपनिकां स्वहस्तलपनेषु।
रविदाहवारणार्थं
स्त्रीपुरुषा वै निलिम्पन्ति॥३८॥

अग्नेरापो जाता
दृष्यन्ते राजमार्गेषु।
मृगतृष्णाजलदृश्यं
दृश्यं मध्याह्नवेलायाम्॥३९॥

किन्त्वस्मिन्नपि काले
वरयात्राः सज्जिता यान्ति।
वरश्च वस्त्राविष्टो
वधूगृहं याति वडवास्थः॥४०॥

विकटनिदाघानन्तर-
मायाता बिन्दवो वृष्टेः।
उत्पातस्यानन्तर-
मायाति सुशासनं हि यथा॥४१॥

(रचनातिथिः २९.६.२००९)

●

पूर्वोत्तरश्रीस्मृतिः

(१)

सप्तभगिन्यो मोदन्ताम्

असमत्रिपुरामेघालयमणिपुरारुणाचलनागधरा
मिजोरमाख्या किञ्च सुरम्या धराधरैः शोभिता धरा।
सप्तराज्यसमुदायकलेवरधारिण्यो भारतशोभाः
इमा उदीच्यां पूर्वस्यामथ सप्तभगिन्यो मोदन्ताम्
सप्तभगिन्यो मोदन्ताम्॥

सिक्किमे गंगटोके यदीये श्रुते
रज्जुमार्गेण यात्रिव्रजः पश्यति।
भूसुखाख्यां नदीं भूसुखं पर्वतं
भूतले भाति तन्मामकं भारतम्॥

(२)

सिक्किमसंस्कृत सम्मेलनम्

गणटोकाख्या नगरी
तरुशोभितपर्वतैर्लसिता।
जयति भरतवसुधायाः
सिक्किमराज्यस्य राजधानी या॥१॥

गणेश-हनुमन्मन्दिर-
दर्शनपूता भवन्ति जनाः।
विविधस्थलावलोकन-
सुखिता आगन्तुका यत्र॥२॥

भूसुख (भूसुक) संज्ञा पर्वत-
माला कुल्या च रज्जुमार्गेण।
दृष्टा सुखं ददाति
प्रसन्नयात्रिव्रजाय शुभा॥३॥

सिच्चेसंज्ञा वसती
रमणीयालोक्यते नीचैः।
रज्जुपथा गच्छद्भिः
पर्यटकैः कौतुकाविष्टैः॥४॥

मंगन-लाचुङ्-लाचेन्-
त्सोम्नो-मार्गे स्थितं यस्य।
चिन्तनभवनाख्यं सद्
भवनं सम्मेलनौपयिकम्॥५॥

अस्मिन् चिन्तन-भवने
रासंसंस्थानयोजितं दृष्ट्वा
राष्ट्रियसंस्कृतसम्मे-
लनमतिहृष्टा भवन्ति जनाः॥६॥

सम्मेलनस्य यस्योद्-
घाटनसत्रे महोत्साहैः।
वक्तृभिरथ च श्रोतृभि-
रलंकृतं श्रीसभागारम्।।७।।

श्रीलिम्बू मुख्यातिथि-
रासीत्पूर्वः प्रमुखमन्त्री।
संस्कृतमासीत्पठितं
स्वशैशवे येन गुरुमुखतः।।८।।

संस्कृतभाषाविषये
प्ररोचना प्रस्तुता तेन।
मुख्यमन्त्रिणा (चाम्लिंगेन) प्रेषित-
मथ पठितं तेन संदिष्टम्।।९।।

कार्कीनामा मन्त्री
ग्रामीणविकाससम्बन्धी।
नेपालीभाषायां
संस्कृतमहिमानमाभाषत।।१०।।

कुलपतिराधावल्लभ-
वदनाब्जविनिर्गतं तदनु।
अध्यक्षीयं भाषण-
मासीत्सिक्किमधरासुखदम्।।११।

तेनैकस्मिन् पद्ये
सिक्किमराज्यस्य वन्दनं विहितम्।
तच्छुत्वा श्रोतारो
मुदिता वै करतलध्वनिना॥१२॥

श्रीपौडियालरुद्र-
प्रसादनामाधिकृतविद्वान्।
सारस्वतातिथिः सन्
प्राभाषत संस्कृतोन्नतये॥१३॥

तदनु च चायास्वादोऽ-
ग्राहि जनैस्तत्र समवेतैः।
तदनन्तरमारब्धं
शैक्षिकसत्रं शुभं प्रथमम्॥१४॥

पी.जी.योगी-शिप्रा-
शुक्लरमाकान्तनामका यत्र।
झाचन्द्रभूषणश्चा-
पठन् स्वपत्राणि विद्वांसः॥१५॥

पाण्डेयरमाकान्तः
सञ्चालितवान् सुसत्रमिदम्।
ततश्च सर्वैरशितं
भूतलभवने निरामिषं भोज्यम्॥१६॥

तदनु च चिन्तनभवने
लेप्चानृत्यानि जातानि।
तेन् दँग् ल्हो रुम फट्-किङ्-
चुङ्-बोङ्साख्यानि विविधानि॥१७॥

तदनन्तरं च मणिपुर-
समागतैः सत्कलाकारैः।
राधामाधवरासः
प्रदर्शितो मणिपुरीशैल्या॥१८॥

संकीर्तनांगभूतं
मृदंगढक्कादिवादनोपेतम्।
चलनं विलोक्य तेषां
मनांसि केषां न रक्तानि (हृष्टानि)॥

श्री लालो गोपालः
शर्मासीदगुरुवरस्तेषाम्।
प्राचार्यः श्रीराधा-
माधवविद्यालयस्य बुधः॥१९॥

राष्ट्रियसंस्कृतसम्मे-
लनस्य दिवसे द्वितीयेऽथो।
अम्बेडकरस्मृत्यां
व्याख्यानं योजितं जातम्॥२०॥

श्रीभागीरथिनन्दः
समाचरन्मंगलाचरणम्।
श्री एन.के. प्रधानो
मुख्यातिथिपदमलंकृतवान्।।२१।।

विजयबहादुरसिंहो
मुख्यो वक्ता च यत्राभूत्।
कुलपतिराधावल्लभ-
महोदयोऽध्यक्षतां कृतवान्।।२२।

तदनु द्वितीयसत्रं
योजितमासीत्सभागारे।
यत्राशोककुमारो
गोस्वाम्यासीत्सभाध्यक्षः।।२३।।

श्रीरत्नमोहनेना-
भिराजराजेन्द्रमिश्रेण।
पंकजमिश्रेणाथो
त्रिपाठिना चन्द्रधरनाम्ना।।२४।।

अध्यक्षेण तथा श्री-
गोस्वामिमहोदयेन विज्ञेन।
पठितानि विविधविषया-
नवलम्ब्य स्वीयपत्राणि।।२५।।

अभ्यवहृत्यास्माभि-
स्ततः सदस्यैः कृता यात्रा।
रुमटेकस्थप्रसिद्ध-
श्रीबौद्धमठस्य पूतस्य॥२६॥

छात्रा यत्र पठन्ति
त्रिपिटकभागान् गुरोः पार्श्वे।
प्रश्नोत्तरं तथा ते
परस्परं यत्र कुर्वन्ति॥२७॥

श्रीबुद्धस्य प्रतिमा
यत्र मठे राजमानास्ते।
यत्र च भित्तिषु विविधाः
कथास्तथागतपरा लिखिताः॥२८॥

यत्र सुवर्णस्तूपं
पश्यन्त्यागंतुका नित्यम्।
श्रद्धापूरितमनसा
बुद्धं यत्र स्मरन्ति जनाः॥२९॥

परावृत्तिवेलायां
जागर्याख्यं प्रपातमवलोक्य।
पाइनरिज-लुँगताख्यं
होटलयुग्मं वयं प्राप्ताः॥३०॥

पाइनरिजसंज्ञेऽतिथि-
भवने सौकर्यसत्कारी।
राजेशोऽथ च मोहन-
झाशीर्वादस्य पात्रं मे॥३१॥

अन्तिमदिवसे जातं
शैक्षिकसत्रद्वयं, यत्र।
दशाधिका विद्वांसोऽ-
पठन् स्वपत्राणि विविधानि॥३२॥

योगेशचन्द्रशास्त्री
वर्षाशीतिं समुत्तीर्णः।
ऐतिह्यपूर्णभारत-
मवलम्ब्यादात्स्ववक्तव्यम्॥३३॥

त्रिपुरावदानमवलम्ब्य
भाषितं चक्रवर्तिना समुदम्।
चन्दनकुमारनाम्ना
विबुधेनागरतलस्थेन॥३४॥

श्रीमान् प्रफुल्लचन्द्रो
गोस्वामी स्वीयशोधदले।
पूर्वोत्तरराज्यानां
शिक्षानीतिं विवृतवान् वै॥३५॥

डाक्टरबलदेवानन्द-
सागरेणात्मनः पत्रे।
अविनाश्याख्योपन्यास
इक्षितः शोधसंदृष्ट्या॥३६॥

सिक्किम-गृहसचिवः श्री-
रवीन्द्रतैलंगनामको युवकः।
सिक्किमराज्यच्छात्रान्
प्रेरितवान् संस्कृतोन्नतये॥३७॥

राजेन्द्रनाथशर्मा
स्वीयेऽध्यक्षीयभाषणे विद्वान्।
विद्वद्वरशास्त्रिमनो-
रंजनरचनाः समीक्षितवान्॥३८॥

उत्तरपूर्वदिशायां
स्थितेषु राज्येषु मोक्षलाभार्थम्।
राजेन्द्रो मोहन्ती
गैर्वाण्या भूमिकामपठत्॥३९॥

हरिदत्तः शर्मा निज-
पत्रे रेखांकितं कृतवान्।
पूर्वोत्तरराज्याना-
मवदानं संस्कृते सम्प्रति॥४०॥

श्रीनारायणदाशो
भागीरथिनन्दविज्ञवर:।
पाण्डेयरमाकान्तो
डाक्टरसोमेशमिश्रश्च॥४१॥

उमारमणझापण्डित-
वर्योऽध्यक्षश्च सत्रस्य।
उत्तरपूर्वदिशाया
अवदानं सुरगिराऽचकथन्॥४२॥

कविसमवायोऽप्यन्तिम-
दिवसे संयोजितो जात:।
कविवरराधावल्लभ
आसीदध्यक्षवर्योऽस्य॥४३॥

संयोजकोऽस्य डाक्टर-
बलदेवानन्दसागरो धीमान्।
एकादश कवयोऽत्र
कवितापाठं प्रकुर्वन्ति॥४४॥

ये कवय: समवेता-
स्तेषां नामानि कथ्यन्ते।
नैकग्रन्थविधायी
श्रीराधावल्लभ: प्रथम:॥४५॥

‘अभिराजो’ राजेन्द्रो
मिश्रश्चात्र द्वितीयोऽस्ति।
हरिदत्तः शर्मास्ते
तृतीयसंख्यः प्रयागस्थः।।४६।।

अत्र चतुर्थो दिल्ली-
वासी शुक्लो रमाकान्तः।
झाचन्द्रभूषणः श्री
उमारमणझा च विद्येते।।४७।।

पञ्चम-षष्ठौ, नारा-
यणदाशः सप्तमश्चात्र।
श्रीकामताप्रसाद-
स्त्रिपाठिवर्योऽष्टमः प्रथितः।।४८।।

श्रीभागीरथिनन्दो
नवमश्चास्ते सुकण्ठकविः।
बनमालीबिस्वालो
नायातो व्यापृतोऽन्यत्र।।४९।।

एवं नवसंख्याकाः (लाकृतिसंख्याः)
कवयः काव्यं पठन्त्यत्र।
सहृदयजनसम्मर्दः
काव्यं श्रोतुं समुत्सुकोऽत्रास्ते।।५०।।

तदनु च समापनोत्सव-
वेलायामतिथयः सर्वे।
सिक्किमवियोगजन्यं
कष्टं हृदये निधास्यन्ति॥५१॥

तत्रामन्त्रित आस्ते
महामहिमराज्यपालश्रीः।
बी.पी.सिंहो विद्वान्
मुख्यातिथिपदमलंकर्तुम्॥५२॥

किञ्च सुखं सिक्किमभू-
संस्कृतसम्मेलनेन संजातम्।
हृदये निधाय सर्वे
निजनिजगेहं गमिष्यन्ति॥५३॥

श्रीगंगटोकनगरी
जयतात् प्रकृतिप्रकृष्टरंगधरा।
जयतात् सिक्किमराज्यं
संस्कृतसेवासमुद्यतं नित्यम्॥५४॥

जयताद् भारतदेशो
विविधकलापूरितः सकलः।
जयतात्करुणामुदिता-
मैत्रीयुक्तं तथा विश्वम्॥५५॥

जयताच्चिन्तनभवनं
समवेता यत्र विद्वांसः।
सत्कवयश्च भरतभू-
भागेभ्यः सङ्गता मुदिताः।।५६।

जयतात्सुरवाणी या-
खिलभाषाप्रेरणादात्री।
जयतान्मम कवितेयं
सिक्किमराज्येऽस्ति या रचिता।।५७।।

नवोत्तरद्विसहस्रे
कैस्तेऽब्देऽक्तूबरे मासे।
एकादशे दिनांके
विरच्य या श्राविता मयका।।५८।।

(रचनातिथिः ११.१०.२००९, गंटोके, चिन्तनभवने)

शीतलहरी!

इयं प्राप्ता संक्रान्तिरथ मकरस्यामितगुणा
तिलोत्पादान् मिष्टान् ददति हि गुरुभ्योऽत्र महिला:।
तदाशीर्वादैस्ता मनसि मुदिता: कान्तसहिता:
पतिं पत्नीं प्रेम्णा मदयति शुभा शीतलहरी॥१॥

इमे ये निर्मान्ति श्रमिकनिवहा: स्विन्नवदना:
बहूच्छ्रायं गेहं सुविपणिमथो राजसरणिम्।
अथ क्षेत्रे रात्रौ ददति सलिलं ये च कृषका:
तदुत्साहं छेत्तुं (भंक्तुं) प्रभवति न वै शीतलहरी॥२॥

यदा नन्तुं लब्धुं तरितुमथ पातुं गणयितुम्
जना गंगां पुण्यं भवजलधिमाप: प्रभुगुणान्।
हरद्वारे कुम्भे विदधति महामेलनमहं
तदा माघे मासे भवति विवशा शीतलहरी॥३॥

कवोष्णा आपो वै स्नपनविधये सन्ति लषिता:
जनैर्भोक्तुं काम्यास्तिलगुडकृता गज्जकगणा:।
विभिन्नान् संयावान् लवणसहितान् पक्ववटकान्
सखे! माघे मासे रसयति जनान् शीतलहरी॥४॥

गृहे स्थित्वा लोकः स्वदति समुदं पक्ववटकान्
मनुष्याः सेवन्ते मृदुसुखकरं स्वापपटकम्।
घना कूहा व्योम्नि स्थगयति रविं चन्द्रसदृशं
सखे माघे मासे शिशिरयति नॄन् शीतलहरी॥५॥

खगा भीता भीताः शिशिरमथिता वृक्षनिलयाः
रवेस्तापाकांक्षी श्व-गवय-गवां भ्राम्यति गणः।
अथो सत्त्वोद्याने कुहरशयितः श्वापदगणः
सखे! माघे मासे व्यथयति जनान् शीतलहरी॥७॥

हिमानी-कूहाभ्यां प्रखरहिमवायुप्रसरणै-
र्विमानप्रस्थानं स्थगितमथ गन्त्र्याः प्रचलनम्।
तथापीच्छन् पान्थः सरससुखयात्रा-व्रतमहो!
सखे! माघे मासे द्रढयति जनान् शीतलहरी॥८॥

(रचनातिथिः १४.०१.२०१०)

●

कवित्वं मे तिरोभूतम्

यदा वित्ते मनो लग्नं,
कवित्वं मे तिरोभूतम्।
यथार्थ पश्यतो जगतः,
कवित्वं मे तिरोभूतम्॥१॥

मनो मे वीक्ष्य चारित्र्यं
निजानां हन्त! नेतॄणाम्।
उदासीनं यदा जातं,
कवित्वं मे तिरोभूतम्॥२॥

गता सुहृदो दिवं नैके
तथा सम्बन्धिनो रुष्टाः?
मनो निर्विण्णतां यातं,
कवित्वं मे तिरोभूतम्॥३॥

यदा पक्षे धनान्धानां
मया जयघोष उद्घुष्टः।
उपेक्षाया दरिद्राणां,
कवित्वं मे तिरोभूतम्॥४॥

विपर्यस्तेषु सम्बन्धेषु
वैदुष्ये घनीभूते।
तथा तर्कोदये चित्ते,
कवित्वं मे तिरोभूतम्।।५।।

यदा धनलोभतो गीता
मया गाथाऽविनीतानाम्।
तदा तेजो विलुप्तं मे,
कवित्वं मे तिरोभूतम्।।६।।

यदा मयका स्तुताः षिड्गा
दयारहिताः पिशाचाभाः।
मृतो वाचां विलासो मे,
कवित्वं मे तिरोभूतम्।।७।।

अदण्ड्या दण्डिता जाता-
स्तथा दण्ड्या त दण्ड्यन्ते।
विलोक्यैतत् विपर्यासं
कवित्वं मे तिरोभूतम्।।८।।

धनं देशस्य नेतारो
विदेशे स्थापयन्ति यदा।
मलीमसकर्म कुर्वाणाः
कवित्वं मे तिरोभूतम्।।९।।

यदाहं बुद्धिजीवीसंज्ञको
जीवोऽभवम् बन्धो!
कुतर्काभ्यासितां यातः,
कवित्वं मे तिरोभूतम्॥१०॥

यदा मुखतां गतोऽहं
वञ्चकानां धूर्तसंघानाम् ।
अमानुषकार्यकर्तॄणां
कवित्वं मे तिरोभूतम्॥११॥

यदा शिक्षाव्रतांश्छात्रान्
समाप्यापि स्वमभ्यासम्।
अहं वृत्तिं विना वीक्षे
कवित्वं मे तिरोभूतम्॥१२॥

प्रजातन्त्रे प्रजानामेव
दुरवस्थां यदा वीक्षे।
तदा कुण्ठाजले मज्जत्
कवित्वं मे तिरोभूतम्॥१३॥

यदा वै लेखकाः सम्पादकाः
देशस्य खण्डार्थम्।
ददति वक्तव्यमधिकृत्या
कवित्वं मे तिरोभूतम्॥१४॥

मया पाण्डित्यपटुता क्लिष्ट-
कल्पनमथ कृते साध्ये।
सचेतःक्षोभकरणार्थं,
कवित्वं मे तिरोभूतम्॥१५॥

यदाहं भारभूतः सन्
सचेतश्चित्तकष्टकरः।
सभामध्येऽभवं क्रूरः
कवित्वं मे तिरोभूतम्॥१६॥

(रचनातिथिः २०.११.२०१०)

पुस्तकम्

ज्ञानविस्तारकं प्रेरणाकारकं
भावनाधारकं मूढतादारकम्।
शोकसंहारकं स्फूर्तिसञ्चारकं
जाड्यसन्तारकं राजते पुस्तकम्॥१॥

पुस्तकस्थापि विद्या भवेद्रक्षिता
पुस्तकं मित्रवच्छास्ति तत्पाठकम्।
अन्धकारात्प्रकाशं नयेन्मानवं
सेवितं सादरं मोददं पुस्तकम्॥२॥

नैकलिप्यङ्कितं नैकवर्णैर्युतं
नैकरूपान्वितं नैकनामोज्ज्वलम्।
नैकसिद्धान्त-नानाकथाराजितं
वन्दनीयं च सेव्यं जनैः पुस्तकम्॥३॥

मानवो यत्क्षणे स्याद्विषण्णस्तदा
दर्शयेत्पुस्तकं तस्य मार्गं ध्रुवम्।
संशयच्छित् परोक्षार्थसन्दर्शकं
विश्वनृणां समायोजकं पुस्तकम्॥४॥

ताडपत्रेषु वा भूर्जपत्रेषु वा
क्रोडपत्रेषु वा ताम्रपत्रेषु वा।
स्वर्णपत्रेषु वा प्रस्तरेऽथापि वा
लेखितं टङ्कितं वन्द्यते पुस्तकम्।।५।।

स्वर्णवर्णैस्तथा कृष्णवर्णैर्युतं
ज्ञानबीजाक्षरैः पूरितं यद्भवत्।
देशिकोक्तं च यद्धन्ति चेतस्तम-
स्तत्सुवन्द्यं समेषां नृणां पुस्तकम्।।६।।

मूषिका-पुत्तिका-कीट-वर्षाजलै-
र्नाश्यते प्रायशोऽरक्षितं पुस्तकम्।
मित्र! तेभ्यः सदा रक्षणीयं त्वया
स्वीयकक्षस्थितं ज्ञानदं पुस्तकम्।।७।।

पुस्तकागारसंस्थापितं पाठकै-
र्नैव चेत्पठ्यते नाप्यथो बुध्यते।
नैव वा शोध्यते नैव वाभ्यस्यते
निष्फलं सत्तदा खिद्यते पुस्तकम्।।८।।

मूर्खहस्ते गतं धूलिभिर्दूषितं
तैलनीरादिभिस्त्रासितं ग्लायति।
किञ्च कण्ठे स्थितं व्याकृतं सद्गिरा
शोभते विज्ञसंसेवितं पुस्तकम्।।९।।

यद्धि मेलापके पण्यवद्भासते
यच्च गेहे स्थितं रत्नवद् द्योतते।
उद्धृतं विज्ञगोष्ठीषु यज्जृम्भते
तन्न कस्य प्रियं स्यात्सखे पुस्तकम्॥१०॥

ग्रन्थकृद्भिस्तथा वर्णसंयोजकैः
पाठसंशोधकैश्चाथ मुद्रापकैः।
चित्रकारैस्तथा सावधानैर्ध्रुवं
प्रस्तुतं सज्जितं भाति सत्पुस्तकम्॥११॥

ग्रन्थकर्तुस्तपस्यां तथा जीवनं
तस्य सत्प्रेरणां पाठकानां कृते।
नैजचित्ते दधत् शोभते सर्वदा
ज्ञानविज्ञानदं मित्र सत्पुस्तकम्॥१२॥

(रचनातिथिः ०९.०१.२०११)

●

अन्नाहजारे!

राष्ट्रे भ्रष्टाचारकोपो विवृद्धः
नेतारोऽभूवँश्च गर्धापरीताः।
लोको भूत्वा वञ्चितो रोरुदीति
दृष्ट्वैतत् चिन्तापरोऽभूद् हजारे॥१॥

अन्नाहजारे! भवता कठोरं
दिल्लीपुरे स्वानशनं विधाय।
अहिंसया भ्रष्टजनाः भयार्ताः
कृतास्तथायाच्यत लोकपालः॥२॥

समर्थनं ते विविधस्थलेषु
ह्याबालवृद्धा जनता करोति।
नेताभिनेता श्रमिणो युवानः
सर्वे तवेहां परिपोषयन्ति॥३॥

आपादचूडं प्रसृतो य आस्ते
स भ्रष्ट आचार इहास्ति रोगः।
उन्मूलनायास्य भवान् विधत्ते
त्यक्ताशनः सन् कठिनां तपस्याम्॥४॥

आकाशवाण्या अथ दूरदर्शनात्
उदन्तपत्रेषु च मुख्यवृत्तवत्।
प्रसारितं तेऽनशनं जयत्यहो
स्वदेशकल्याणसमीहया युतम्॥५॥

मिस्रेऽथो वा लीबियादेशमध्ये
रक्तक्रान्तिव्यापृतानां जनानाम्।
नो लभ्योऽभूद् यो जयः शासकेषु
प्राप्तः शीघ्रं स त्वया श्रीहजारे॥६॥

प्रजातन्त्रे मुख्यं भवति जनताया अभिमतम्
सदा सम्मान्यं तद् सपदि सकलैः शासकजनैः।
अतः सत्याहिंसापथचलितमान्दोलनमिदं
शुभं ते साफल्यं गतवदधुनाल्पैरपि दिनैः॥७॥

केन्द्रीयशासनं सद्यः स्वीचकार तवाग्रहम्।
उदघोषयच्च प्रस्तोतुं लोकपालविधेयकम्॥८॥

श्रुत्वैतद्भवता स्वसंगिनिवहास्त्यक्ताशना बोधिताः
तेषां चानशनव्रतस्य समभूत् सामूहिकी पारणा।
तत्पश्चात्किल बालिकाकरसरोजाभ्यां प्रदत्तं रसं
पीत्वा स्वानशनं समापितवताऽहिंसाजयो मानितः॥९॥

अन्नाहजारेनाम्नस्तेऽपरस्येव महात्मनः।
श्रीगान्धिनो विचाराः स्युः सफला लोकनायक!॥१०॥

भ्रष्टाचारस्य लोपः स्यात् सौराज्यं स्थापितं भवेत्।
लोकतन्त्रस्य रक्षायै लोकपालो नियोज्यताम्॥११॥

(रचनातिथिः - ०९.०४.२०११)

●

श्रीमदन्नाहजारे! जय त्वं जय!

भ्रष्टकृत्या जना भीतभीताः कृता
लोकपालाख्यसंस्थाजनिर्निश्चिता।
त्वत्तपो वीक्ष्य जातं नतं शासनं
श्रीमदन्नाहजारे! त्वयैतत्कृतम्।।१।।

गातुमेते प्रवृत्तास्त्वदीयं यशो
बाल-वृद्धा युवानो युवत्यस्तथा।
देश आन्दोलितो लोकशं कांक्षता
श्रीमदन्नाहजारे! त्वया, त्वं जय।।२।।

नेतृवृन्दस्य चेतस्सु भीतिः कृता
देशलुण्टाकसंघा भयं प्रापिताः।
लोकचित्ते सदाशा समुद्भाविता
श्रीमदन्नाहजारे! त्वया, त्वं जय।।३।।

देहलीमध्यगे यन्त्रमन्त्राभिधे
स्थानके या तपस्या त्वयानुष्ठिता।
संसदात्मार्पितस्तद्वशात् त्वत्पुरः
श्रीमदन्नाहजारे! जय त्वं जय।।४।।

संगता लोकपालाख्यसंस्थाकृते
लक्षशः कोटिशो ये जना भारते।
तत् त्वदाह्वानसामर्थ्यविस्फूर्जितम्
श्रीमदन्नाहजारे! जय त्वं जय॥५॥

रक्तपातं विना शस्त्रपातं विना
क्रान्तिरेषा समुत्साहिनी यागता।
विश्वमेतत्तया शिक्ष्यते प्रेर्यते
श्रीमदन्नाहजारे! जय त्वं जय॥६॥

शासनासन्दिकाराधनैकव्रताः
वञ्चनाचुञ्चवः केऽपि नेतृब्रुवाः।
त्वद्विरोधे ब्रुवाणा जनैर्निन्दिताः
श्रीमदन्नाहजारे! जय त्वं जय॥७॥

लुण्ठितं भारतं प्राक्तु वैदेशिकैर्
लुण्ठ्यमानं तदास्तेऽद्य नैजैर्जनैः।
नायतौ देश आस्तां हि नो लुण्ठितं
श्रीमदन्नाहजारे! प्रभावात्तव॥८॥

देश आस्तां कदाचारमुक्तः सदा
भ्रष्टकृत्यानि नाशं व्रजेयुर्द्रुतम्।
आत्मतन्त्र्यं सुपुष्टं भवेद् भारते
श्रीमदन्नाहजारे! तवेच्छा जयेत्॥९॥

श्रीमदन्नाहजारे-महानायकं
        प्राप्य मोदान्विता भारतीयाः जनाः।
देशमातुः सुतोऽयं शतं जीवतात्
        भारतस्यास्तु सन्मङ्गलं सर्वदा॥१०॥

ये तवेच्छाविरोधं जनाः कुर्वते
        ते सुपुष्टिं न देशस्य कांक्षन्ति रे!
ईश्वरस्तेषु दद्यात् सुबुद्धिं सदा
        मोदतां वर्धतां राजतां भारतम्॥११॥

(रचनातिथिः ११.०४.२०११)

वर्धापनम्

संस्कृतसंवादाख्यं पाक्षिकपत्रं प्रकाश्यते भवता।
श्रुत्वेदं सद्वृत्तं मोदे, वर्धापनं भवते॥१॥

सामग्र्या आमन्त्रणमङ्गीकरणं तथाक्षरीकरणम्।
सम्पादन-संशुद्धि-प्रकाश-वितरणविधिश्च तपः॥२॥

अस्मिंस्तपसि निलीना ये लोकहितं प्रकुर्वाणाः।
प्रजातन्त्रसंरक्षकपत्रकृतस्ते हि मानार्हाः॥३॥

अनुष्ठाननित्यत्वं तेषां स्वातन्त्र्यमपकर्षति।
लोकमताविष्करणे व्रतस्थिताः पत्रकारा हि॥४॥

एवं सत्यपि केचन जनाः समुत्साहिनो धीराः।
सावधिकैर्निजपत्रैर्ज्ञानालोकं वितन्वन्ति॥५॥

ये निर्भयास्तटस्था लोकशुभाकांक्षिणोऽविरतम्।
सावधिकं निजपत्रं प्रकाशयन्त्यत्र ते वन्द्याः॥६॥

संस्कृतसंवादस्य प्रकाशकाः पत्रकाराश्च।
विश्वबन्धुताप्रेरकसंस्कृतभाषोन्नतिं कुर्युः॥७॥

साहित्यिक-सामाजिक-शैक्षिक-संस्कृतिपराणि वृत्तानि।
पत्रे प्रकाशितानिप्रपठ्य लोकाः प्रमोदन्ताम्॥८॥

अनारतं स्यात्प्रगतिः 'संस्कृतसंवाद'-पत्रस्य।
उत्साहाध्यवसायावक्षुण्णावस्य तिष्ठेताम्॥९॥

(रचनातिथिः - २७.०६.२०११)

●

नवाभिनन्दनम्

श्रीरङ्गाचार्यपी.टी.जी. डाक्टरोपाधिभूषितः।
संस्कृते ज्यौतिषे किञ्च दर्शनेषु विचक्षणः॥१॥

अध्यापनेन शोधेन भाषणेन विपश्चिताम्।
चेतो हरति सत्काव्यैस्तथा चायं बुधोत्तमः॥२॥

दैवज्ञरत्नश्रीसूर्यसदनास्थानपण्डितः।
स्वर्णघण्टाकङ्कणादिसम्मानैर्यो विभूषितः॥३॥

श्रीवाजपेयिकविताः येनानूद्य सुसंस्कृते।
अर्जिता पुष्कला कीर्तिः कविकोविदसंसदि॥४॥

चमत्कारशतं किञ्च ग्रन्थान्नैकान् प्रणीतवान्।
अज्ञानध्वान्तनाशाय शिष्याणां यो रविप्रभः॥५॥

सम्मेलनेषु गोष्ठीषु संवादशिबिरेषु च।
देववाणीप्रसाराय यततेऽहर्निशं च यः॥६॥

विद्वत्सभासु नैकासु लब्धाशीर्यो महात्मभिः।
कविता-हरिकथा-नाट्य-गीत-सङ्गीतकारकः॥७॥

अस्य विद्वद्वरेण्यस्य षष्टिपूर्तिमहोत्सवे।
वर्धापनानि भूयांसि समर्प्यन्ते मया मुदा॥८॥

शतायुष्को भवेच्छ्रीमान् विद्यावान् कीर्तिमांस्तथा॥
रङ्गाचार्यः सकुटुम्बो भगवत्कृपया सदा॥९॥

(रचनातिथिः २८.०६.२०११)

अभिवन्दनम्

ब्रह्मश्रीवेमकोटिश्रीसूर्यनारायणाभिधः।
शर्मा विजयते विद्वान् संस्कृतश्रीविभूषितः॥१॥

आयुर्वेदस्य यो विद्वान् यजुर्वेदविचक्षणः।
संगीत-नृत्य-वास्त्वादि-नदीष्णो यः शतक्रतुः॥२॥

मन्दिराणां समुद्धारं स्थापनाञ्चापि योऽकरोत्।
अयुर्वेदस्य वेदानां शालानां स्थापनाकरः॥३॥

वेद-वेदान्त-तत्त्वज्ञा नाट्य-नृत्यकलाविदः।
काव्य-सङ्गीत-निष्णाताः विद्वांसो येन मानिताः॥४॥

सूर्यस्तूपस्य निर्माणं शिक्षासमितियोजनम्।
यज्ञशाला-ध्यानकेन्द्रस्वास्थ्यालयविनिर्मितिम्॥५॥

कृत्वा, दिवानिशं लोकसंग्रहे तत्परः स्वयम् ।
परमेश्वरपूजायां निरतो वर्तते सदा॥६॥

आयुर्वेदभिषग्रत्नमायुर्वेदविशारदः।
विश्वतोमुखयाजी च यज्ञवाचस्पतिस्तथा॥७॥

निगमाभिज्ञस्तथा सौरदीक्षासम्राड्विभूषितः।
योगेश्वरः क्रियासिद्धानन्दो यज्ञवसिष्ठकः॥८॥

एतैस्तथान्यैर्बिरुदैर्भूषितो यः प्रतिष्ठितैः।
सौरदीक्षासार्वभौमः परोपकृतिविग्रहः॥९॥

तस्य सप्तत्यब्दपूर्तिवेलायामभिवन्द्यते।
ब्रह्मश्रीवेमकोटिश्रीसूर्यनारायणो मया॥१०॥

(रचनातिथिः २९.०६.२०११)

पञ्चदशं विश्वसंस्कृतसम्मेलनम्

विज्ञानसंज्ञभवने नवदेहलीस्थे
यद्योजितं जनवरी-प्रथमे त्रिभागे।
पक्षात्मशून्यनयनां (२०१२) कित-कृस्तुवर्षे
तद्विश्वसंस्कृतसुमेलनमस्तु शान्त्यै॥१॥

इदं पञ्चदशं वैश्वं संस्कृतस्य सुमेलनम्।
समुद्घाटयितुं प्राप्तः सिंहः श्रीमनमोहनः॥२॥

भारतस्य प्रधानो यो मन्त्री संक्षिप्तभाषणः।
'संस्कृतं भारतस्यात्मे'ति वाचं स उदीरयत्॥३॥ (युग्मकम्)

हिन्दीभाषाप्रयुक्तं तद्वाक्यं श्रुत्वा समैर्जनैः।
हर्षो व्यक्तः सभागारे स्वकीयैः करताडनैः॥४॥

प्रधानमन्त्रिणा प्रोक्तं संस्कृतस्योन्नतिर्भवेत्।
ज्ञानविज्ञानशाखाभिः पूर्णं संस्कृतवाङ्मयम्॥५॥

इह मानवसंसाधन-
विकासमन्त्री कपिलनामा।
सिबलेतिवंशनामा-
ध्यक्ष्यं कर्तुं समायातः॥६॥

तेनापि संस्कृतस्य
प्रचार आकांक्षितो भुवने।
प्रतिभागिनां समेषा-
मभिनन्दनमपि तथाकारि।।७।।

अर्धहोरात्मके सत्रे सर्वं कार्यमनुष्ठितम्।
अभिनन्द्याभवत्तत्र पूर्णा समयबद्धता।।८।।

वात्स्यायनकपिलाया
आध्यक्ष्ये तदनु विद्वांसौ।
अक्लूजकरोऽशोको
लोकेशश्चाप्यभाषाताम्।।९।।

ततो विविधकक्षेषु शोधपत्रप्रवाचनम्।
अनुष्ठितमभून्नित्यं षड्दिनानि यथाक्रमम्।।१०।।

वेद-वेदांग-शास्त्राणि काव्य-नाटक-सत्कथाः।
अवलम्ब्याभवच्चर्चा शोधसत्रेषु धीमताम्।।११।।

विज्ञानभवनस्याथो 'प्लेनरीहॉल'-संज्ञके।
सभागारे पण्डितानां कवीनाञ्च सभाभवत्।।१२।।

वसु-दर्शन-शून्याक्षि (२०६८)-वैक्रमेऽब्दे पुनर्वसौ।
पौषमासि सिते पक्षे पूर्णिमायां सभाभवत्।।१३।।

नेत्रात्मखाक्षि (२०१२) कृस्त्वब्दे जन्वर्यां सोमवासरे।
पण्डितानां कवीनाञ्च वैखरी स्फुरिताभवत्॥१४॥

संस्कृतकविसमवाये
द्वाविंशतिकविभिरात्मनो रचनाः।
'अभिराज'स्याध्यक्ष्ये
पठिताः सहृदय-समभिनन्द्याः॥१५॥

अस्मिन्नेवावसरे
'कविभास्कर्या'श्चतुर्थोऽङ्कः।
राधावल्लभ-कुलपति-
करकमलाभ्यां विमोचितो जातः॥१६॥

अक्लूजकरोऽशोको
मान्सब्रूसंज्ञकोऽथ कविवर्यः।
शास्त्री च कलानाथः
श्रीमान् हरिराम आचार्यः॥१७॥

'मणि'-'कण्णन'-रामकरण'-
'माधव'-'पुष्पा'-'रमाकान्ताः'।
मुरलीमाधव इच्छा-
रामो रामः कुमारश्च॥१८॥

राधावल्लभ-राधा-
कान्ताद्याः कवय आयाताः।
येषां रचनाः श्रावं
श्रावं श्रोतार उत्फुल्लाः॥१९॥

दशमे दिने समापन-
सत्रस्यायोजनं जातम्।
श्रीकर्णसिंह आसीत्
मुख्यातिथिरत्र समयज्ञः॥२०॥

अध्यक्षपदे शीला-
दीक्षितवर्या समासीना ।
यास्ते मुख्यो मन्त्री
दिल्लीराज्यस्य सर्वकारस्य॥२१॥

गोस्वामी च रमाकान्तः
वालिया किरणोत्तरा।
उभौ मन्त्रिपदारूढौ
सत्रेऽन्त्ये समुपस्थितौ॥२२॥

शास्त्री योगानन्दः
विधानपीठस्य योऽध्यक्षः।
स्वीयोपस्थित्येदं
सत्रमलंकर्तुमायातः॥२३॥

विशिष्टातिथिरूपेण 'एमिटी'-स्थापनाकरः।
श्रीमानशोकचौहान उपस्थित इहाभवत्॥२४॥

रासंसं-कुलपतिना
राधावल्लभबुधोत्तमेनेह।
सम्मेलनस्य विवरण-
मदीयत त्रिदशवाग्द्वारा॥२५॥

ततो देश-विदेशस्थ-विदुषामभिनन्दनम्।
सम्मानपत्रोर्णावस्त्र-स्मृतिचिह्नैरजायत॥२६॥

इन्दिरासत्कलाकेन्द्रे पूर्वरंगस्य योजनम्।
नाट्यप्रदर्शनं ग्रन्थ-लोकार्पणमथोऽभवत्॥२७॥

ग्रन्थमेला तथा भव्या 'विश्ववारा'-प्रदर्शनी।
दर्शकानां प्रमोदाय ज्ञानवृद्ध्यै च योजिते॥२८॥

संस्थानसहयोगेन 'शारदा' नाम पत्रिका।
दिनपत्रस्वरूपेण नित्यमेव प्रकाशिता॥२९॥

वसन्तानन्तगार्ग्येण तस्याः सम्पादनं मयि।
न्यस्तं, मया यथाशक्यं तदाज्ञापालनं कृतम्॥३०॥

सहायकोऽभूद्द्विपिनो वर्णयोजनकर्मणि।
वेदप्रकाशः शर्माभूत् मुद्रणे साह्यकृत्तथा॥३१॥

कुज्झटिकावृतदिल्ली
वैश्वं संस्कृतसुमेलनं दृष्ट्वा।
आतपमिषेण सहसा
हसिता प्रीत्या समापनस्य दिने।।३२।।

प्रारब्धं वेदपाठेन सम्पूर्णं बुधवन्दनैः।
सम्मेलनमिदं भूयाद् विश्वमंगलकारकम्।।३३।।

(रचनातिथि: १०.१.२०१२)

गुर्जरीयां धरां तां नमामो वयम्

श्लाघनीया त्रिलोक्यां मता रत्नसूः
वन्दनीयं च तत्रास्ति मे भारतम् ।
कीर्तनीया च तत्रापि या राजते
गुर्जरीयां धरां तां नमामो वयम् ॥१॥

आतिथेयाः जनाः, सात्त्विकं भोजनं
स्वावलम्बोद्यमो भक्तिभावो हृदि ।
यत्र वाङ्माधुरी शास्ति दृप्तान् जनान्
गुर्जरीयां धरां तां नमामो वयम् ॥२॥

अक्षराद्ये शुभे धाम्नि कर्णावती-
पूःस्थिते यत्र रात्रौ जलीये पटे ।
नाचिकेतीयवृत्तं प्रतिक्षिप्यते
गुर्जरीयां धरां तां नमामो वयम् ॥३॥

यत्र कण्ठीरवाणां ध्वनिः श्रूयते
यत्र चाब्धेस्तरंगध्वनिः श्रूयते ।
गायकानां ध्वनिर्यत्र च श्रूयते
गुर्जरीयां धरां तां नमामो वयम् ॥४॥

श्यामलारण्यभूम्या तथोद्यानकैः
राजमार्गैस्तटाकैश्च विद्यालयैः ।
मन्दिरैर्मस्जिदैर्यास्ति संशोभिता
गुर्जरीयां धरां तां नमामो वयम् ॥५॥

भूमिकम्पं विषह्यापि भीता न या
चिन्तिता नापि या वीक्ष्य चोपद्रवान् ।
या चतुर्दिक्-विकासं समाकांक्षति
गुर्जरीयां धरां तां नमामो वयम् ॥६॥

यत्र सिद्धेश्वरो यत्र चाम्बा परा
यत्र सोमेश्वरो भक्तकल्पद्रुमः ।
आस्तिकेभ्यो ददत्यात्मतुष्टिं च या
गुर्जरीयां धरां तां नमामो वयम् ॥७॥

यत्र च द्वारकाधीश आराध्यते
यत्र च श्रीभवो नाथ आराध्यते ।
दत्तपादाम्बुजानां च यत्रार्चना
गुर्जरीयां धरां तां नमामो वयम् ॥८॥

भारतस्य प्रतिष्ठां सुपुष्टिं तथा
वर्धयन्ती विकासं तथा नूतनम् ।
भक्तिभावं दधाना च या मानसे
गुर्जरीयां धरां तां नमामो वयम् ॥९॥

साभ्रमत्यास्तथा नर्मदाया जलैः
किञ्च तापी-मही-पुष्टिदैर्वारिभिः ।
सेचिता या प्रसन्ना सती राजते
गुर्जरीयां धरां तां नमामो वयम् ॥१०॥

यास्त्यहिंसा-तपस्यास्थली विश्रुता
धर्म-कामार्थ-मोक्षप्रदा पावनी ।
यत्र सत्यप्रयोगाः कृता गान्धिना
गुर्जरीयां धरां तां नमामो वयम् ॥११॥

यत्र रत्नाकरस्यातिरम्ये तटे
सोमनाथस्य लब्ध्वा प्रसादं शुभम् ।
जायते धन्यधन्यो जनो जीवने
गुर्जरीयां धरां तां नमामो वयम् ॥१२॥

स्वामिनारायणः स्वोपदेशैः शुभैर्
लोकमुद्बोध्य जातोऽस्ति वन्द्यो नृणाम् ।
यत्र कृष्णप्रणामी च संमोदते
गुर्जरीयां धरां तां नमामो वयम् ॥१३॥

स्वामिनारायणाख्ये गुरूणां कुले
दर्शनाख्ये च गीर्वाणवाणीगृहे ।
भारतस्यायतिर्यत्र संरक्ष्यते
गुर्जरीयां धरां तां नमामो वयम् ॥१४॥

श्रीदयानन्द-गान्धी-पटेलोपमाः
यत्सुता विश्वसत्प्रेरणादायकाः ।
डाण्डियारास आस्ते च यस्याः श्रुतो
गुर्जरीयां धरां तां नमामो वयम् ॥१५॥

यत्र गर्बाभिधानं हि सन्नर्तनं
दर्शका वीक्ष्य मोदं पर लम्भिताः ।
सत्कला यत्र चित्तं चमत्कुर्वते
गुर्जरीया धरां तां नमामो वयम् ॥१६॥

गाँठिया-फाफड़ा-खाकरा-भाखरी-
ढोकला-खम्मणाद्यैर्बहुव्यञ्जनैः ।
षड्रसैस्तर्पयन्त्यस्ति यागन्तुकान्
गुर्जरीयां धरां तां नमामो वयम् ॥१७॥

वेदपाठस्य घोषेण सम्पूरिता
या च कम्प्यूटरीयप्रकर्षान्विता ।
सत्कलाधारिणी या विकासैषिणी
गुर्जरीयां धरां तां नमामो वयम् ॥१८॥

इन्धनान्वेषणं तैलसंशोधनं
कर्षणं सत्कथाश्रावणं कुर्वती ।
यास्त्यहिंसारसेन प्रपूर्णा प्रपा
गुर्जरीयां धरां तां नमामो वयम् ॥१९॥

लोकगीतेषु चित्तं यदीयं रतं
लोकनृत्येषु चित्तं यदीय रतम् ।
लोककृत्येषु चित्तं यदीय रतं
गुर्जरीयां धरां तां नमामो वयम् ।।२०।।

नर्तकैर्वादकैर्गायकैर्नेतृभिः
साधकैः सद्भिरुद्योगसञ्चालकैः ।
देशभक्तैर्बुधैश्चास्ति यालंकृता
गुर्जरीयां धरां तां नमामो वयम् ।।२१।।

सागरीयैस्तटैः कच्छभूधन्वना
जंगलैरद्रिभिश्चोर्वरैः क्षेत्रकैः ।
राजमार्गैश्च या यन्त्रगेहैर्युता
गुर्जरीयां धरां तां नमामो वयम् ।।२२।।

यत्र चोषानिरुद्धप्रसिद्धा कथा
श्राव्यते माणभट्टैः रसैरन्विता ।
वादयद्भिर्घटं रञ्जयद्भिर्जनान्
गुर्जरीयां धरां तां नमामो वयम् ।।२३।।

गीयते लोकगीतेषु शम्भोः
कथा गायकैर्भव्यवेशैस्तथा सुस्वरैः ।
पठ्यते यत्र दोहा च तारस्वरैर्
गुर्जरीयां धरां तां नमामो वयम् ।।२४।।

विश्वकोषोपमो लब्धवाणीवरः
संस्कृत-प्राकृत-ग्रन्थकर्ता महान् ।
हेमचन्द्रः प्रसिद्धः प्रदत्तो यया
गुर्जरीयां धरां तां नमामो वयम् ॥२५॥

रामगाथाप्रणेता कविर्नर्मदः
कृष्णभक्तो नृसिंहस्तथा मेहता ।
यत्र भक्तिप्रवाहेण लोकश्रुतौ
गुर्जरीयां धरां तां नमामो वयम् ॥२६॥

डोंगरेजी-सदृक्षैस्तथा कृष्ण-
चन्द्रोपमैः शास्त्रिभिः सेविताजीवनम् ।
श्रीमुरारी रमेशश्च यत्पुत्रकौ
गुर्जरीयां धरां तां नमामो वयम् ॥२७॥

माधवो हर्षदेवोऽथ नानावटी
राजपूर्वो रसो वासुदेवाभिधः ।
यत्र चान्येऽपि सत्काव्यकाराः श्रुताः
गुर्जरीयां धरां तां नमामो वयम् ॥२८॥

'देवसायुज्य'-'बोरी'-प्रदीपा'दिभिः
पत्रकैः सावधीयैः सुसंसेविता ।
'वर्तमानेन पत्रेण'या कीर्तिता
गुर्जरीयां धरां तां नमामो वयम् ॥२९॥

या प्रबन्धस्य विद्यालयैर्भूषिता
यास्ति विज्ञानसंरक्षिका विश्रुता ।
यत्र वाणिज्य-विद्याविकासो नवो
गुर्जरीयां धरां तां नमामो वयम् ॥३०॥

भारतस्य प्रतिष्ठां सुपुष्टिं यशो
वर्धयन्ती विकासं तथा नूतनम् ।
भक्तिभावं दधाना च या मानसे
गुर्जरीयां धरां तां नमामो वयम् ॥३१॥

शोषितो यत्र कश्चिन्न संलक्ष्यते
व्याधिना पीडितो नो तथा दृश्यते ।
यत्र नो कोऽपि दीनोऽस्ति हीनोऽथवा
गुर्जरीयां धरां तां नमामो वयम् ॥३२॥

अद्य देशे समस्तेषु राज्येष्वहो
यत्र सौशासनं निस्तुलं राजते ।
वर्धते यत्र मोदो समेषां नृणां
गुर्जरीयां धरां तां नमामो वयम् ॥३३॥

('गीर्वाणगुर्जरी-कविसमवाये' राष्ट्रियसंस्कृत-कविसम्मेलने १८.२.२०१२तमे दिने रचिता पठिता च रचना)

●

इमौ मम हस्तौ

बिहारराज्ये
अहिंसाप्रचारकस्य
भगवतो बुद्धस्य विहारभूमौ
श्रमिकस्य मम
हस्तौ कर्तितौ
एकेन बलाढ्येन
किमिति?
यतो हि मया पारिश्रमिकं
याचितमासीत्
अहं चिकित्सालये श्वसन्नस्मि
टी. वी. कार्यक्रमनिष्पादकाः
मम च्छायामङ्कयन्ति
सर्वेऽपि दर्शकाः मम दशां वीक्षन्ते
मम हस्तयोश्चिकित्सा चिकित्सकैः क्रियते।
यदाहमितोऽवकाशं प्राप्य गृहं गमिष्यामि
तदा स्वहस्तौ पश्यन्नेव जीवनं गमयिष्यामि।
हस्तौ विना निष्क्रियः सन् कथं भोजनमर्जयिष्यामि
कथं च खादिष्यामि।

को नाम ममावलम्बनं भविष्यति
कस्य कस्य कृते भारभूतोऽहं भविष्यामि
येन मम हस्तौ कर्तितौ
तस्मिन् दण्डितेऽपि
सति किं मम हस्तौ पुनराविर्भविष्यतः
तौ मम हस्तौ
यौ सक्रियतायां भगवत्तरौ भवतः
यौ जगन्नाथतां भजतः।

(रचनातिथिः ०३.०३.२०१२)

•

वार्धक! नमो नमस्ते।।

सुस्वागतं भवतु ते
वार्धक! नमो नमस्ते।
अनुभवनिधान बन्धो
वार्धक! नमो नमस्ते।।१।।

इदमासनं सुसज्जं
देहे मम त्वदर्थम्।
आगच्छ, तिष्ठ बन्धो
वार्धक! नमो नमस्ते।।२।।

त्वं स्थायिभावरूपं
सञ्चारि पूर्ववृत्तम्।
अध्यक्षभूत वयसां
वार्धक! नमो नमस्ते।।३।।

दौर्बल्यमस्ति मेऽक्ष्णोः
पश्यामि नो कुवृत्तम्।
शमदमविधायकं त्वं!
वार्धक! नमो नमस्ते।४।।

शक्तिर्गतास्ति पदयोः
स्थितधीर्गृहे वसामि।
जितमानसोऽस्मि जातो
वार्धक! नमो नमस्ते।।५।।

कटुकं वचो ब्रुवाणो
निन्द्योऽस्मि नैव यूनाम्।
क्षम्योऽस्मि बालयुवभिः
वार्धक! नमो नमस्ते।।६।।

रोगैर्ममास्ति मैत्री
कायेऽस्मि वीतचिन्तः।
नास्ते मृतेर्भयं मे
वार्धक! नमो नमस्ते।।७।।

आगत्य नो प्रयासि
स्थिरता तव स्वभावे।
वन्द्यस्तव स्वभावो
वार्धक! नमो नमस्ते।।८।।

त्वय्यागते नमस्यो
जातोऽस्मि सर्वयूनाम्।
ज्ञानस्य दुग्धसिन्धो!
वार्धक! नमो नमस्ते।।९।।

परमेश्वरस्य भक्तिं
कर्तुं लभेऽवकाशम्।
निर्भीकतां गतोऽहं
वार्धक! नमो नमस्ते॥१०॥

वृद्धोपसेविनो मां
नत्वाशिषं लभन्ते।
बाला भणन्ति "बाबा"
वार्धक! नमो नमस्ते॥११॥

सह पौत्र-पौत्रिकाभिः
खेलामि संलापमि।
तेष्वीश्वरं च वीक्षे
वार्धक! नमो नमस्ते॥१२॥

वेदान्ततत्त्वबोधः
कर्तुं सुशक्य आस्ते।
सुशकास्ति तत्त्वचिन्ता
वार्धक! नमो नमस्ते॥१३॥

जीवनमिदं हि यात्रा
त्वं चान्तिमो विरामः।
क्रमशो भवामि पूर्णो
वार्धक! नमो नमस्ते॥१४॥

शीर्षं वलक्षमास्ते
बाधिर्यबाधितोऽहम्।
निन्दां स्तुतिं न जाने
वार्धक! नमो नमस्ते॥१५॥

समदुःखसौख्य आसे
समशत्रुमित्र आसे।
भगवत्प्रियोऽस्मि जातो
वार्धक! नमो नमस्ते॥१६॥

ज्ञानी मतोऽस्मि लोके
युवभिर्भवत्प्रसादात्।
श्रेष्ठासनं लभेऽहं
वार्धक! नमो नमस्ते॥१७॥

नो शोभते सभा सा
यत्रास्ति नैव वृद्धः।
त्वमलंकृतिः सभाया
वार्धक! नमो नमस्ते॥१८॥

लोकैषणाभिरभितो
ग्रस्तोऽस्मि नो इदानीम्।
विरतिः प्रियाऽधुना मे
वार्धक! नमो नमस्ते॥१९॥

शैथिल्यमिन्द्रियाणां
स्थायित्वदातृ जातम्।
सुलभा निवृत्तिरास्ते
वार्धक! नमो नमस्ते॥२०॥

चित्राणि पूर्ववयसः
संवीक्ष्य हासमेमि।
आसं किमस्मि किं वा
वार्धक! नमो नमस्ते॥२१॥

त्वं निन्द्यसे किमिति नो
जानामि नैककविभिः।
करुणानिधानमसि मे
वार्धक! नमो नमस्ते॥२२॥

बालश्च वृद्ध आस्ते
समरूप एव लोके।
लाल्यो भवेत् समेषां
वार्धक! नमो नमस्ते॥२३॥

त्वय्यागते लभेऽहं
सुविधा विभिन्नरूपाः।
एषोऽस्ति तेऽनुभावो
वार्धक! नमो नमस्ते॥२४॥

बस-रेल-वायुयाने-
ष्वर्धं प्रदाय मूल्यम्।
यात्रां करोमि हृष्टो
वार्धक! नमो नमस्ते॥२५॥

गोधूम-मुद्ग-गृञ्जन-
संयावलाभहेतोः।
व्याजोऽस्त्यदन्तता मे
वार्धक! नमो नमस्ते॥२६॥

मुनिवृत्तिधारणार्थं
त्वं योग्यभूमिरुक्तम्।
ना त्वां विनास्त्यपूर्णो
वार्धक! नमो नमस्ते॥२७॥

वृद्धप्रजल्पितं मे
कलहस्य नास्ति हेतुः।
लोकस्य हास्यहेतु-
र्वार्धक! नमो नमस्ते॥२८॥

जीवेच्छतं समानां
न त्वां विनां नरोऽत्र।
हे वेदवाक्यपोषक
वार्धक! नमो नमस्ते॥२९॥

मेट्रो-बसादियाने
स्थानं सुरक्षितं मे।
जातं त्वदीयकृपया
वार्धक! नमो नमस्ते॥३०॥

वार्धक्यवृत्तिरधुना
वृद्धिं भजिष्यते मे।
नूनं तव प्रभावात्
वार्धक! नमो नमस्ते॥३१॥

त्वय्यागते भवतु मे
कामं शरीरमबलम्।
सबलं तु मानसं मे
वार्धक! नमो नमस्ते॥३२॥

सौख्यासने (सोफासने) निषण्ण:
साकं स्वभार्ययाहम्।
कुर्वे विनोदवार्ता
वार्धक! नमो नमस्ते॥३३॥

पूर्वं मया कृतं यत्
सर्वं निवेद्य प्रभवे।
निश्चिन्ततां प्रपद्ये
वार्धक! नमो नमस्ते॥३४॥

अग्रेऽस्ति दीर्घनिद्रा
मोक्षप्रदायिका मे।
मम सा मता प्रतीक्ष्या
वार्धक! नमो नमस्ते॥३५॥

दन्ता गता इदानीम्
रसनास्ति मे प्रसन्ना।
आतंकतो विमुक्ता
वार्धक! नमो नमस्ते॥३६॥

अथ कल्पयामि यद्यत्
दृश्यं भवेन्न तद्यदि।
इच्छा प्रभोः प्रमाणं
वार्धक! नमो नमस्ते॥३७॥

शौद्धौदनिर्विलोक्य
त्वां बुद्धतां प्रपेदे।
त्वं देशिको गुरूणां
वार्धक! नमो नमस्ते॥३८॥

सौभाग्यवान् स प्राणी
यो जायते हि वृद्धः।
शोच्यो भवेदवृद्धो
वार्धक! नमो नमस्ते॥३९॥

मा भूदकालवृद्धो
लोके कदापि कोऽपि।
कालेऽखिलोऽस्तु वृद्धो
वार्धक! नमो नमस्ते।।४०।।

(रचनातिथि: ११.०५.२०१२)

प्राङ्गण-बिल्ववृक्षः

दिल्लीस्थिते विज्ञजनैरुपेते
वाणी-विहारे शुभदर्शनांके।
'रमालये' सर्वजनोपकारी
जयत्यसौ प्रांगणबिल्ववृक्षः॥१॥

मूर्ध्नातपं चण्डकरस्य सोढ्वा
छायां ददात्याश्रितमानवेभ्यः।
पतत्रिणामाश्रयतां गतो मे
गृहस्थितः प्रांगणबिल्ववृक्षः॥२॥

छायास्य वीथ्यामपि शोभमाना
तां सेवते पुंगव एक एत्य।
केचिज्जना मध्यदिनेऽत्र पत्र-
क्रीडारताः स्वं समयं नयन्ति॥३॥

ज्येष्ठे सुपुष्पैः सुरभीकरोति
सम्पूर्णगेहं मुदमादधानः।
वीथ्यां चरन्तः सकला जनाः स्वं
व्यञ्जन्ति मोदं कुसुमानि दृष्ट्वा॥४॥

प्रत्यूषकाले मधुमक्षिकाभिः
सगुञ्जनं सेव्यत एष शाखी।
रसप्रदायी सुरभिप्रदायी
द्विजालिसेव्यस्तरुरेष वन्द्यः॥५॥

शिवार्चनार्थं त्रिदलानि नेतुं
जनाः समीपादथ दूरदेशात्।
अमुं शरण्यं शरणं व्रजन्ति
पत्रप्रदः प्रांगणविल्ववृक्षः॥६॥

ज्येष्ठात्मजो मेऽस्य रहस्यविज्ञः
फलानि युक्त्यास्य चिनोति धीरः।
माता तदीया च कुटुम्बनृभ्यो
ददाति तेषां स्वरसं समेभ्यः॥७॥

भवत्ययं यर्हि दलैर्विहीनः
गृहांगणं तर्हि तपत्यजस्रम्।
पुनश्च काले त्रिदलैः समृद्ध-
श्छायाप्रदो हृष्यति विल्ववृक्षः॥८॥

अस्यात्मजः श्रीवरदेश्वरस्य
क्षेत्रे युवा सन् सफलो विभाति।
छायाप्रदः पत्रफलप्रदायी
श्रीशंभुसेवानिरतो भिवान्याम्॥९॥

‘चिक्रोड’नामा तरुजन्तुरस्मिन्
स्वशावकैर्धावनमातनोति ।
छिन्नाः पतङ्गा गगनात्पतन्तः
समाश्रयन्तेऽस्य शरण्यशाखाः ॥१०॥

छायामधः क्रीडति पौत्रवर्गो
द्विचक्रिकारूढ इतस्ततोऽस्य।
काकस्तु निर्माय कुलायमस्मिन्
स्वविष्ठयामुं समलीकरोति॥११॥

(रचनातिथिः ०७/०६/२०१२)

●

सुहृदुत्तमो मदीयो गोपालकृष्णदाशः

सुहृदुत्तमो मदीयो
गोपालकृष्णदाशः।
वन्द्यो न कस्य विदुषो
गोपालकृष्णदाशः॥१॥

श्मश्रूपनेत्रधारी
कन्दर्पदर्पहारी।
नित्यं परोपकारी
गोपालकृष्णदाशः॥२॥

शिष्यान्धकारहर्ता
सद्ग्रन्थवृन्दकर्ता।
सज्जनपथानुसर्ता
गोपालकृष्णदाशः॥३॥

विद्याटवीविहर्ता
कण्ठाग्रसूक्तिधर्ता।
अज्ञानपुञ्जहर्ता
गोपालकृष्णदाशः॥४॥

शान्तस्तथैव दान्तः
कादम्बिनी-सुकान्तः।
अक्लान्त एव नित्यं
गोपालकृष्णदाशः॥५॥

वाणी-विहार-वासी
पत्नीव्रती विलासी।
स्मेराननः सुहासी
गोपालकृष्णदाशः॥६॥

छात्रोपकारलग्नः
शास्त्राम्बुधौ सुमग्नः।
उत्साहवानभग्नः
गोपालकृष्णदाशः॥७॥

अनुशासनस्य शक्तिं
श्रीलिङ्गराज-भक्तिम्।
निजमानसे दधानो
गोपालकृष्णदाशः॥८॥

छात्रावलम्बभूतः
वाक्कायचित्तपूतः।
विद्या-वसन्तदूतः
गोपालकृष्णदाशः॥९॥

अभिनन्द्यते सुहृद्भिः
शिष्यैस्तथा विनीतैः।
सन्मान्यते च विबुधैः
गोपालकृष्णदाशः॥१०॥

षष्ट्यब्दपूर्तिकाले
तेजोऽस्ति यस्य भाले।
नवयौवनो विजयते
गोपालकृष्णदाशः॥११॥

गोष्ठीषु मोदमानः
स्वगुरूंश्च वन्दमानः।
हृष्येत्समेधमानः
गोपालकृष्णदाशः॥१२॥

अध्यापकोत्तमोऽयं
सम्पादकोत्तमोऽयम्।
जयताद् बुधोत्तमोऽयं
गोपालकृष्णदाशः॥१३॥

जीयाच्छतं समानां
वन्द्योऽस्तु सज्जनानाम्।
लभतां चिरप्रतिष्ठां
गोपालकृष्णदाशः॥१४॥

अभिनन्दितो रमायाः कान्तेन सप्रमोदम्।
प्रीतो भवेत् सदा श्रीगोपालकृष्णदाशः॥१५॥

(रचनातिथिः १९.०९.२०१२, गणेशचतुर्थी वि.सं. २०६९)

●

बलात्कृतिर्मास्तु कुत्रापि

जगति जना जनवर्या
आरम्भान्नूतनं वर्षम्।
सम्मानयन्ति तस्य
स्वागतमथ पूर्वसन्ध्यायाम् ॥१॥

किन्तु सपद्येव यथा
मृतास्ति युवतिर्बलात्कारे।
स्मारं स्मारं दुष्कृति-
मेतां सीदति मनो मेऽद्य ॥२॥

घटितं यद् देहल्यां
दिसम्बरे षोडशे दिवसे।
तच्छ्रुत्वा तज्ज्ञात्वा
नितरां चित्तं विषीदति मे ॥३॥

षड्भिः पिशाचसदृशै-
र्युवभिर्बसयानमध्यगतैः।
बलात्कार-दुष्कृत्या
युवतिः परिपीडिता पापैः ॥४॥

सामूहिकदुष्कृतिरिय-
मासीदत्यन्तदुर्घोरा।
नो केवलं बलात्कृति-
रङ्गच्छेदोऽपि पापिभिर्विहितः ॥५॥

तीक्ष्णायोदण्डस्या-
घातो विहितस्तनौ पापैः।
असृक्प्रवाहोऽतितमां
जातो हा हा युवत्यङ्गात् ॥६॥

सा च वसन्त-विहारे
क्षिप्ता नग्ना भयंकरे शीते।
क्षिप्तस्तस्याः सुहृदपि
मार्गे क्षतविक्षताङ्गस्तैः ॥७॥

पुलिसेन शवः सफदर-
जंगचिकित्सालये नीतः।
तत्र च रक्तस्रावो
नो विरतः पीडिताया हा! ॥८॥

अङ्गपरीक्षणकर्त्र्या
दशां तदीयां विलोक्य भणितमिदम्।
एतादृशा व्रणा नोऽ-
द्यावधि दृष्टा बलात्कारे ॥९॥

विजयदिवस-शर्वर्यां
भारतभूराजधान्यां हा!
कीदृक् पापं घटितं!
रोमाञ्चकरं समेषां यत् ॥१०॥

'धिक् पुलिसं धिक् दिल्ली-
शासनमथ केन्द्रशासनं धिक् स्तात्।
सत्सु येषु घटते हा!
मध्येमार्गं बलात्कारः' ॥११॥

इत्याक्रोशो व्यक्तः
पूर्वं दिल्ल्यां जनैस्तदनु देशे।
स्थाने स्थाने जातं
प्रदर्शनं क्रुद्धजनतायाः ॥१२॥

जनसम्मर्दं दृष्ट्वा
नेतारः केचनायाताः।
राजनीतिखेलायाम्-
अतिचतुरा 'वोट' चेतारः ॥१३॥

सञ्चारमाध्यमेषु
प्रसिद्धिमाप्नोदियं वार्ता।
जनताया आक्रोशो
वृद्धिं परमामगाद् दिल्ल्याम् ॥१४॥

जनताकरोत्प्रदर्शन-
मात्मन आक्रोश-शोक-पीडानाम्।
नवदिल्लीस्थे प्रथिते
क्षेत्रेऽथो इण्डिया-गेटे ॥१५॥

तद्दमयितुं पुलिसबल-
मकरोद्दण्डप्रहारमबलासु।
जलधारायाः क्षेपं
हेमन्तर्तौ तथा शीते ॥१६॥

मेट्रोयानस्थानक-
दशकं तालकपिहितमभवत्।
कटकमभून्नवदिल्ली-
प्रथिताङ्गणमिण्डियागेटम् ॥१७॥

नाम न तस्या ज्ञातं
नो तत्पित्रोर्न वा निवासस्य।
सा पीडितैव घुष्टा
सर्वैः सञ्चारमाध्यमैरनिशम् ॥१८॥

सा 'दामिनी'ति कथिता
कैश्चित् सा 'वेदना' भणिता।
सा 'निर्भये'ति गदिता
केनापि च पीडितोक्ता सा ॥१९॥

सफदरजंगचिकित्सा-
लयमध्ये तच्चिकित्साभूत्।
प्रथमं भिषग्भिरुक्तं
दशा तदीया सुधारमभ्येति ॥२०॥

किन्तु परस्ताद्भिषजोऽ-
कथयन् तस्या दशां चिन्त्याम्।
कश्चिच्छंकां कृतवान्
यत्सा मृत्युं प्रपन्नासीत् ॥२१॥

केनाप्युक्तं यत्सा
मरणासन्ना मृतेव वा चास्ते।
जनताक्रोशं दृष्ट्वा
तन्मरणं घोषितं नास्ते ॥२२॥

'सा मृत्युनाथ कुरुते
संघर्षं' तत्पिता प्राह।
'नूनं जेष्यति सास्मिन्
संघर्षे ह्यन्ततो गत्वा' ॥२३॥

जनता प्रदर्शनादथ
वृत्तदलेभ्यश्च शासनं भीत्वा।
तां प्रैषयच्चिकिसा-
हेतोः सिंगापुरं देशम् ॥२४॥

तया च साकं तस्याः
पितरावपि प्रेषितावास्ताम्।
जनैश्च कथितं तस्या
मृत्युस्त्वधुना सुनिश्चितोऽस्त्येव ॥२५॥

पित्रा तस्या उक्तं
'नास्ति प्रमादश्चिकित्सायाम्।
मम तनयेयमवश्यं
मृति-संघर्षे विजयिनी स्यात्' ॥२६॥

ऊनत्रिंशे दिवसे
दिसम्बरीयेऽन्यथैवाभूत्।
प्रत्यूषे शनिवारे
प्रसारितं तन्मृतेर्वृत्तम् ॥२७॥

मैट्रोयानाधिकृतै-
र्नैकस्थानकपिधानमुद्घुष्टम्।
स्तब्धो लोकश्चासीत्
करुणापूरितमना सजलनयनः ॥२८॥

सार्धद्विवादने सा
सिंगापूरे गतासुका जाता।
इत्यधिकृतः प्रवक्ता
वृत्तं प्रासारयत्तत्र ॥२९॥

दिल्ली-जन्तर-मन्तर-
प्रदर्शनांगणगतो लोकः।
मधूच्छिष्टवर्तीनां
दीपनतः शोकमुद्गिरति ॥३०॥

राष्ट्रपतिश्च प्रधानो
मन्त्री नैके च नेतारः।
शोकं निजवक्तव्यैः
समयज्ञाः स्वं प्रकटयन्ति ॥३१॥

वादविवादा वार्ताः
परिचर्चा दूरदर्शने दृश्याः।
दर्शकमतसंकलनं
क्रियते काण्डस्य विषयेऽस्य ॥३२॥

सर्वे भणन्ति घोरं
दण्डं प्राप्स्यति बलात्कारी।
कश्चिद्वदति तदर्थं
नूतनविधिनिर्मितिर्भविता ॥३३॥

पुलिसविभागः कथयति
आरोपदलं स प्रस्तोष्यति।
अभिनेतारो मुम्बइ-
नगरे कुर्वन्ति पदयात्राम् ॥३४॥

दिल्ली-पुलिसेन जना
उक्तास्ते नैव गच्छन्तु।
प्रदर्शनार्थं किञ्च
भ्रमणार्थं हीण्डियागेटम् ॥३५॥

श्रीमनमोहनसिंहः
प्रधानमन्त्री प्रदर्शयति नैजाम्।
सहानुभूतिं पीडित-
युवतेः कौटुम्बिकैः सार्धम् ॥३६॥

लोकः स्वीयं शोकं
क्षोभञ्चाभिव्यनक्ति निर्व्याजम्।
शासनमपि तं जेतुं
स्वरं स्वरे तस्य मेलयति ॥३७॥

ऊनत्रिंशदिनांके
रात्रौ दशवादनस्य वेलायाम्।
सिंगापुरतो दिल्ली-
मायातुं व्योमयानमुड्डीनम् ॥३८॥

त्रिंशत्तमे दिनांके
दिसम्बरीये शवः प्राप्तः।
दिल्लीं विमानमार्गात्
त्रिवादनप्रायकालेऽस्याः ॥३९॥

कांग्रेसदलाध्यक्षा
सोन्यागांधी प्रधानमन्त्री च।
श्रीमनमोहनसिंहः
विमानपत्तनधरां यातौ ॥४०॥

द्वाभ्यां दिवंगतायै
श्रद्धाञ्जलिरर्पितस्त्वरितम्।
पुलिससुरक्षाकवचे
तदनु शवः पीडितागृहं प्राप्तः ॥४१॥

ततो द्वारकोपनगर-
चतुरुत्तरविंशसैक्टरे तस्याः ।
प्राप्तः शवः पुलिसबल-
संरक्षित आत्मनीनैः सह ॥४२॥

प्रथमं पुलिसेनोक्तं
यद् द्रुतमेव क्रियेत शवदाहः।
परं कुटुम्बिविरोधेऽ-
न्त्येष्टिर्जातोदिते सूर्ये ॥४३॥

सघनसुरक्षामध्ये
पिता सुतायै मुखाग्निमदात्।
भस्मीभूते देहे
निश्चिन्तं शासनं जातम् ॥४४॥

कटकत्वं यातासीत्
श्मशानभूमिः पुलिसगुप्ता।
सामान्यजनास्तत्र
प्रवेष्टुमासन्न चानुमताः ।।४५।।

माता विलपति तस्या-
स्त्यक्तान्ना विगतसप्ताहात्।
दीनदयालुचिकित्सा-
लय-नीता योपचर्यते वैद्यैः ।।४६।।

'किमपि भवतु मम पुत्री
हन्त! गता मां विहाय परलोकम्।'
एवं वदति चिकित्सा-
धीना माता मुहुर्मुहुस्तत्र ।।४७।।

किमपि न खादितुमिच्छति
सन्ततिशोकाभिभूता सा।
सा रक्षिता भिषग्भिः
प्रसभं ग्लूकोजदानेन ।।४८।।

त्रिंशत्तमे दिनांके
प्रातः सार्धाश्ववादने तस्याः।
अन्त्येष्टिरभूद्विधिना
पितृगेहे द्वारकासंस्थे ।।४९।।

अन्त्येष्ट्यां सम्मिलिता
मन्त्रिप्रवरास्तथा च नेतारः।
एतेनात्मानं ते
महिममयं दर्शयामासुः ॥५०॥

श्रद्धाञ्जलिं प्रदातुं
तस्यै शतशः सहस्रशोऽथ जनाः।
जन्तर-मन्तर-परिसर-
भुवि समवेताः सजलनयनाः ॥५१॥

राष्ट्रपतिस्त्वां मनुते
संघर्षरतां प्रवीरतरुणीं वै।
अधुना तव प्रशंसा
सर्वैरपि नेतृभिः क्रियते ॥५२॥

नववर्षशुभेच्छाया
बहिष्कृतिं सोनिया कुरुते।
अन्यैर्नेतृवरैरपि
वक्तव्यानि प्रदीयन्ते ॥५३॥

ये जीवन्त्यां तस्यां
चिन्ताकुलमानसा आसन्।
ते तन्महाप्रयाणे
निश्चिन्ता एव दृश्यन्ते ॥५४॥

आयोगः संघटितो
बलात्कृतेर्दण्डदानार्थम्।
विषयेऽस्मिन् जनताया
आमन्त्र्यन्ते विचारा अपि ॥५५॥

आरोपाणां पत्रं
दशशतपृष्ठात्मकं सज्जम्।
न्यायालये पुलिसबल-
मचिरं प्रस्तोष्यतीति विज्ञातम् ॥५६॥

स्मृत्यां तव सम्पूर्णं
राष्ट्रं शोकाकुलं रोदिति।
जीवन्त्यासीरबला
मृत्वा वीरांगना जाता ॥५७॥

त्वं चिरनिद्रालीना
जागरितं कृतवती लोकम्।
लोको यदि जागरितः
शुभं भवेल्लोकतन्त्रस्य ॥५८॥

हे पीडिते! तवात्मा
शान्तिं लभताम् प्रभुं याचे।
तव पितरौ च लभेताम्
शक्तिं सोढुं महाशोकम् ॥५९॥

रे राक्षसाः! शृणुध्वं
कुरुत कदापि न बलात्कारम्।
अयमस्ति महत्पापं
सामाजिकदूषणं तथा चायम् ॥६०॥

किं किं त्वया न सोढं
बलात्कृतेः पीडया निहते?
त्वयका सह यद् घटितं
त्वमेव जानासि तद् वृत्तम् ॥६१॥

नो जानीते कश्चिद्
विनेश्वरं त्वामथो च तान् दुष्टान्।
यद् घटितं तद्रात्रौ
तत्साक्ष्यं कोऽधुना दास्यति? ॥६२॥

त्वं तु गता परलोकं
जीवन्त्यधुनापि ते दुष्टाः।
न्यायनीतिरतिमन्थर-
गतिरथ लोकोऽस्ति विस्मरणशीलः ॥६३॥

त्वयि जीवन्त्यां ये ये
नेतारः सक्रिया आसन्।
अनुपस्थित्यां तव ते
तूष्णीम्भावं गमिष्यन्ति ॥६४॥

अद्यापि भारतेऽस्मिन्
जगद्गुरौ श्रूयते वार्ता।
तत्तत्स्थानेषु बला-
त्कृतेर्जघन्यस्य कृत्यस्य ॥६५॥

क्वचिदारक्षी क्वचिदपि
दुस्संस्कारो नरः कुरुते।
बलात्कृतिं गर्ह्यामिति
टी.वी.-वार्ताः प्रसार्यन्ते ॥६६॥

वृत्तदलेष्वपि नित्यं
हा हा! दृश्या बलात्कृतेर्वार्ताः।
कर्णाकर्णिकयाथो
श्रूयन्ते तादृशोदन्ताः ॥६७॥

अधुना द्रष्टव्यं को
भवति बलात्कारिणां दण्डः!
मुच्यन्ते बद्ध्यन्ते
लम्ब्यन्ते कण्ठपाशे वा! ॥६८॥

अधुना प्रदर्शनार्थं
के नेतारः समायान्ति।
अग्रे द्रष्टव्यं स्यात्
तेषां निष्ठा त्वदर्थीया ॥६९॥

मृत्युदण्ड आजीवन-
कारावासोऽथ लिङ्गविच्छेदः।
विधिनिर्मातृभिरचिरं
बलात्कृतेर्दण्ड उद्घोष्यः ॥७०॥

दूरदर्शने भणितं
साक्षात्कारेऽथ प्राड्विवाकेन।
घोरकठोरविधावपि
नैष्यन्त्यन्तं बलात्काराः ॥७१॥

एतादृशवाक्कीलाः
अपराधिभ्यो बलं प्रदास्यन्ति।
सत्यं किं वा जेष्यति
अनृतं विजयं लभेत रे! नूनम् ॥७२॥

याचेऽहं परमेशं
मम कथनं सत्यमास्तां नो।
पीडितयुवतीविषये
न्यायः सम्यग् विधीयेत ॥७३॥

दण्ड्येत बलात्कारी
दण्डेन महाकठोरेण।
येनायत्यां कोऽपि न
बलात्कृतेः साहसं कुर्यात् ॥७४॥

कालगतिं च ज्ञात्वा
सर्वे तूष्णीं भविष्यन्ति।
केचिद् गृहकार्यपरा
वृत्तमिदं विस्मरिष्यन्ति ।।७५।।

सञ्चारमाध्यमेषु
प्रशान्तिमाप्ते प्रकरणेऽस्मिन्।
सर्वे स्वकार्यलग्नाः
स्वं स्वं गेहं प्रयास्यन्ति ।।७६।।

ये द्राग् विधिनिर्माणं
प्रतिशृण्वन्ति प्रभाविनेतारः।
समयेऽतीते वचनं
नैजं ते विस्मरिष्यन्ति ।।७७।।

जनताक्रोशं शमयितु-
मयं हि मार्गो गृहीतस्तैः।
कस्मिंश्चित्पुनरुदिते
काण्डे ते मौनमाप्स्यन्ति ।।७८।।

केचिन्नूतनवर्षा-
भिनन्दने व्यापृता भविष्यन्ति।
अस्मिन् वातावरणे
कीदृशमभिनन्दनं नवाब्दस्य ।।७९।।

नयनात्मव्योमनयन (२०१२)-
संवत्सरपुस्तिकाप्रथमपृष्ठे।
अंकितमास्ते वैश्वं
संस्कृतसम्मेलनं दिल्ल्याम् ॥८०॥

किन्तूपान्तिमपृष्ठे-
ष्वंकितमास्ते परमकरुणम्।
हन्त! बलात्कृतिपीडित-
वृत्तं लज्जास्पदं दुष्टम् ॥८१॥

एतस्यां वेलायां
नववर्षस्याभिनन्दनं कथं कुर्याम् ।
आपृच्छे कथमथवा
वर्षं वा वर्तमानमपि? ॥८२॥

अस्मिन् वातावरणे
कीदृशमभिनन्दनं भवेत्कस्य?
नास्त्युल्लासो चित्ते
शोकाविष्टं मनोऽस्ति सर्वेषाम् ॥८३॥

एतादृशे जघन्ये
पिशाचकाण्डेऽस्मि खिन्नोऽहम्।
नास्ति मनो मे स्वस्थं
नववर्ष! त्वां कथं वन्दे? ॥८४॥

परमधुना त्वं प्राप्तो
        नवसंवत्सर! मम द्वारि।
कथमतिथेर्न्यक्कारं
        करवाणि? तवाभिनन्दनं कुर्वे ॥८५॥

नवसंवत्सर! शुभदः
        सुखदश्च भवेः समेषां त्वम्।
त्वय्यागते न भवताद्
        बलात्कृतिः क्वापि विश्वेऽस्मिन् ॥८६॥

यः कश्चिदपि बलात्कृति-
        संलिप्तः स्यात् पिशाचनरः।
तस्मै कठोरदण्डो
        दीयेत सुनिश्चिते काले ॥८७॥

एवं दण्डः स्याद्यन्
        न कोऽपि लिप्तो भवेद्बलात्कारे।
सौशील्यं सौजन्यं
        समाजमस्माकमुपकुरुताम् ॥८८॥

सरसं विरसं मधुरं
        कटुकं शुभमशुभमपि नित्यम्।
घटते जगति परं नो
        विस्मर्तुं शक्यते पीडा ॥८९॥

अपि नववर्ष! करिष्यसि
लेपनमस्मिन् व्रणे समाजस्य।
अपि विरता जायेरन्
बलात्कृतेः पापिनोऽसभ्याः ॥९०॥

हे नववर्षास्माभिः
सह त्वमपि प्रार्थयस्व परमेशम्।
'ईश! बलात्कृति-पीडित-
जनात्मने शान्तिलाभः स्यात्' ॥९१॥

'तत्र रमन्ते देवाः
सर्वे नार्यस्तु यत्र पूज्यन्ते।'
इत्युक्तिं विस्मृत्य
प्रकाममहितं स्वकं कुर्मः ॥९२॥

निवर्तमाने वर्षे
कलंकितो लोकभालोऽस्ति।
अपि भवति नवे वर्षे
भवति कलंकस्य मार्जनं ब्रूहि ॥९३॥

हे शासकाः श्रृणुध्वं
प्रतिनिधिभूता जनस्य यूयं स्थ।
जनताया अभिलाषं
ज्ञात्वा तत्पूरणं कुरुत ॥९४॥

धरणी हृणीयतेऽसौ
शासनमवलोक्य नैष्कृतिकम्।
कर्तव्यव्यापृतिमथ
जनरञ्जनमस्य नित्यमाकांक्षति ॥९५॥

पूरय हे नववत्सर!
वसुन्धरायाः शुभामिमामिच्छाम्।
शुभकामना मदीया
गृह्णंस्त्वं शुभप्रदः समेषां स्याः ॥९६॥

स्वास्थ्यं सुखं प्रतिष्ठा
गौरवमथ वर्धतां समाजस्य।
मानवता स्याज्जयिनी
दानवता स्यात्पराजयिनी ॥९७॥

आत्महतिं नो कुर्यात्
कोऽपि कृषाणः क्वचिद्देशे।
विद्यावन्तो मनुजाः
नो सीदन्तां नवे वर्षे ॥९८॥

विनयाधान-सुरक्षण-
भरणानि सुनिश्चितानि सर्वेषाम्।
भवन्तु सर्वो लभताम्
सद्बुद्धिं प्रगतिमानन्दम् ॥९९॥

नीचैरुपरि च गच्छति
दशा मनुष्यस्य चक्रवल्लोके।
कष्टप्रदं कुवृत्तं
श्रुतं, सुवृत्तं भवेदग्रे ॥१००॥

अन्योन्यं स्याद् यूनोः
स्वीकृत्या प्रेमपरवशक्रीडा।
किन्तु कदापि जगत्यां
बलात्कृतिर्मास्तु कुत्रापि ॥१०१॥

सर्वः स्वकर्मनिरतो
जगदीश्वरमर्चयन्नित्यम्।
जीवेच्छतं समानां
स्वस्थः पुष्टश्च तुष्टः सन् ॥१०२॥

नववर्षागमकाले
याचे परमेश्वरं करौ बद्ध्वा।
मा भूत् क्वापि कदाचिद्
घृणितबलात्कार आयत्याम् ॥१०३॥

(रचनातिथिः ३१/१२/२०१२)

नववर्ष!

अपि नववर्ष! भविष्यसि
शून्यं पैशाचिकैः कृत्यैः?
अपि चित्तेषु मनुजतां
जागरयिष्यसि नृणां लोके?॥१॥

स्वस्यां स्थितौ न दर्शय
बीभत्सान्यशुभवृत्तानि।
मा च श्रावय दुरिता-
न्यमङ्गलं नाप्युपस्थापय॥२॥


सर्वे भवन्तु सुखिनः
सर्वेऽपि निरामयाः सन्तु।
सर्वे पश्यन्तु शिवं
दैवी सम्पद् विजयिनी स्यात्॥३॥

सर्वैर्निजकर्त्तव्यं
निष्ठापूर्वं सुपाल्यतां लोके।
सर्वो न्यायं लभतां
सर्वेषां मङ्गलं भूयात्॥४॥

(रचनातिथिः ०१.०१.२०१३)

●

काव्यप्रणेता रमाकान्तशुक्लः



जन्मतिथिः २४-१२-१९४० ई०
जन्मस्थानम् खुर्जा (उ०प्र०)
पिता (स्व०) श्री ब्रह्मानन्द शुक्लः
माता श्रीमती प्रियम्बदा शुक्ला
शिक्षास्थले खुर्जास्थश्रीराधाकृष्ण-संस्कृतकालेजः, एन.आर.ई.सी.कालेजश्च।
शिक्षा एम.ए. (हिन्दी-संस्कृतयोः) पीएच०डी० (आगरा), साहित्याचार्यः
राष्ट्रपतिसम्मानप्रमाणपत्रेण पद्मश्री-सम्मानेन चालङ्कृतः संस्कृतविद्वान्।
प्रकाशिता ग्रन्थाःजैनाचार्य रविषेणकृत पद्मपुराण और तुलसीकृत रामचरितमानस (उ०प्र० शासनपुरस्कृतः), उत्तररामचरितप्रियम्वदाव्याख्या (सहलेखनम्)।
प्रकाशितानि काव्यानि भाति मे भारतम्, जय भारतभूमे (उ०प्र० संस्कृत-अकादमी-पुरस्कृते काव्ये), भाति मौरीशसम् (काव्यम्), भारतजनताहम् (उ०प्र० संस्कृतसंस्थानस्य कालिदास-सम्मानेन पुरस्कृतं कवितासंकलनम्), सर्वशुक्ला (कवितासंकलनम्)
नाट्यकृतयः पण्डितराजीयम् (उ०प्र० संस्कृत अकादमी-पुरस्कृतं ध्वनि- नाटकम्), अभिशापम् (उ०प्र० संस्कृत अकादमी-पुरस्कृतं ध्वनिनाटकम्), द्वयोरपि मञ्चप्रस्तुतिः नैकधा जाताः । पुरश्चरणकमलम्, नाट्यसप्तकम्, (दिल्लीसंस्कृतअकादम्या अखिलभारतीयमौलिकसाहित्यरचनापुरस्कारेण सम्मानितम्)।
सम्पादिता ग्रन्थाः संस्कृतसुधा, संस्कृगद्यगुच्छः, अर्वाचीनसंस्कृत-महाकाव्यविमर्शः (खण्डत्रयम्), अर्वाचीनसंस्कृत-साहित्य-परिचयः (खण्डद्वयम्), अर्वाचीनसंस्कृत-संग्रहः (खण्डत्रयम्), अर्वाचीनसंस्कृतम् (त्रैमासिकपत्रम्) १९७९ तः अद्यावधि (दिल्लीसंस्कृतअकादम्या अखिलभारतीय संस्कृतपत्रकारितासम्मानेन सभाजितम्)। **अनूदितग्रन्थः** -अमीना(उपन्यासः)।
काव्यपाठःविदेशेषु मौरीशस-अमेरिका-इटली-यू०के० प्रभृतिषु देशेषु भारतवर्षस्य विविधराज्येषु च समायोजितेषु विविधसमारोहेषु किञ्च आकाशवाणी-दूरदर्शनयोः १९६३ तः अद्यावधि संस्कृतकाव्यपाठः कृतः। आकाशवाण्याः सर्वभाषा-कविसम्मेलने संस्कृतकविरूपेण अनुवादकर्तृकविरूपेण च सहभागिता कृता।
साम्प्रतिकवृत्तिः प्रधान-सम्पादकः - अर्वाचीनसंस्कृतम् (त्रैमासिकपत्रम्)

आवासः'रमालयः' आर-६, वाणी विहारः, नयी दिल्ली-११००५९ (भारतम्)
दूरभाषः ०११-२८५६१८४६

ISBN: 978-81-85924-16-8

ISBN - 978-81-85924-14-4